- Title – दर्शन
- Accession No – Title –
- Accession No –
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language – संस्कृत
- Period –
- Beginning – वायोः सखिलक्षणात्वात्
- End – समस्तयुक्तम्
- Colophon-
- Illustrations -
- Source -
- Subject - दर्शन
- Revisor -
- Author -
- Remarks- अपूर्ण

वायोः सद्वस्तुलक्षणत्वात्सद्वस्तुलक्षणं मायामयत्वं यदुच्यते तदपि व्यक्तस्वरूपमायायैव लक्षणात् मायामयत्वमपि किं न स्यादिति चोदय
ति ननु सद्वस्तुपार्थक्यात् सत्त्वं चेत्तदा कथं अव्यक्तमायायैवमस्यात् मायामयतापि नो ८३ नाव्यक्तत्वं मायामयत्वे प्रयोजकं किंतु
निस्तत्त्वरूपत्वं तच्च मायायामिव वायावप्यस्तीति न मायामयत्वहानिरिति परिहरति निस्तत्त्वरूपतैवात्र मायात्वस्य प्रयोजिका
माशक्तिकार्ययोस्तुल्या व्यक्ताव्यक्तत्वभेदिनोः ८४ ननु शक्तिकार्ययोरुभयोरपि निस्तत्त्वरूपतायामविशिष्टायां व्यक्ताव्यक्तत्वल
क्षणो भेदः कृतः स्यादित्याशंक्य तद्विचारः प्रस्तुतानुपयुक्त इति परिहरति सदसत्त्वविवेकस्य प्रस्तुतत्वात्स चिंत्यतां असत्तावांतरो भेद
आस्तां तद्वस्तुनि योज्य किं ८५ असत्तामायया तत्कार्यरूपस्य वा तयोर्भेदो व्यक्ताव्यक्तत्वरूपः स्यादित्यर्थः ८५ फलितमाह सद्वस्तुनि
शोंऽशो वायुर्मिथ्या यथा वियत् वासयित्वा चिरं वायोर्मिथ्यात्वं मारुतं त्यजेत् ८६ वायोर्यः सदंशस्तद्व्यतिरिक्तं रूपं मिथ्यांशो निस्तत्त्वरूपादिर्वा
योः स्वरूपं सच्च वायुर्निस्तत्त्वरूपादेवाकाशवन्मिथ्याऽपि वायोर्मिथ्यात्वं चिरं वासयित्वा मारुतं त्यजेत् मरुत्सत्यत्वबुद्धिं त्यजेदित्यर्थः ८६
वायोरुक्तं विचारं तेजस्यप्यतिदिशति चिंतयेद्वह्निमप्येवं मरुतो न्यूनवर्तिनं ननु सद्वस्तुन्येकदेशमाश्रित्य मायातत्र वृत्त्यादिनाविषयदादी
नां न्यूनाधिकभाव उक्तः स लोकेऽन्यत्रापि दृश्यत इत्याशंक्याह ब्रह्माण्डावरणेष्वेषा न्यूनाधिकविचारणा ८७ वायोः किंयतांशेन न्यूनो
वह्निरित्यत आह वायोर्दशांशतो न्यूनो वह्निः तस्य वास्तवत्वशंकां वारयति वायौ प्रकल्पितः ननु यन्न्यूनाधिकभावः स किं पौरुषेयकल्
ल्पित इत्याशंक्याह पुराणेषूक्तं तारतम्यं दशांशतो भूतपंचके ८८ वह्नेः स्वरूपमाह वह्निरुष्णः प्रकाशात्मा अत्रापि वायाविव कारणधर्मा

दृष्ट्वा विस्मयते बुधः २६ बुधो वियतस्तोऽस्य विवेक्ता गगनस्य सत्यत्वं ब्रुवाणं निरवकाशसद्वस्तु बोधयति तं दृष्ट्वा विस्मयं प्राप्नोतीत्यर्थः
२६ उक्तन्यायमन्यत्राप्यतिदिशति एवमाकाशमिथ्यात्वे सत्यत्वे विवेचिते न्यायेनानेन वाय्वादेः सद्वस्तु पृथग्विविच्यताम् २७ ननु आ-
काशकार्यस्य वायोः कारणभूतेन सद्वस्तुना तादात्म्यप्रतीत्ययोगात्तयोर्विवेचनमप्रयोजकमित्याशंक्य सामान्यात्संबंधाभावे विपरी-
परयासंबंधास्तीत्याह सद्वस्तुन्येकदेशस्थमायायामेकदेशगं वियत्तत्राप्येकदेशगतो वायुः प्रकीर्तितः २८ एवं सद्वाय्वोः संबंधप्र-
दर्शयित्वा यो धर्मस्तयोर्भेदज्ञानाय वायोः प्रतीयमानानन्यमीनाह शोषः स्पर्शो गतिर्वेगो वायोर्धर्मा इमे मताः एवं प्रातिस्विकान् धर्मानभिधा-
य कारणतः प्राप्तांस्तानाह त्रयः स्वभावाः सन्मायाव्योम्नां ये ते पि वायुगाः २९ सन्मायाव्योम्नां ये त्रयः स्वभावाः शीलविशेषाः ते पि वायु-
गा वायौ विद्यमाना इत्यर्थः २९ केते धर्मा इत्यत आह वायुरस्तीति सद्भावः सतो वायोः पृथक्कृते निःसत्त्वरूपता मायायाः स्वभावो व्योमगो ध्वनिः ३०
वायुरस्तीति व्यवहारहेतुः सद्रूपं सद्वस्तुनो धर्म एकः वायोः सद्वस्तुनो विवेचिते सति यन्निःसत्त्वरूपं तं मायाधर्मो द्वितीयः शब्दो व्योम्नः
सकाशादागतो धर्म इति तृतीय इत्यर्थः ३० ननु व्योमविवेचनप्रस्तावे वाय्वादिष्वनुवृत्तं सन्न तु व्योमेति भेदधीरित्युक्तं वाय्वादावाकाशा-
नुवृत्तिर्निवारितेऽस्मिन् व्योमानुवृत्तिरभिधीयते ऽतः पूर्वोत्तरविरोध इति शंकते सतोनुवृत्तिः सर्वत्र व्योम्नो नेति पुरेरितं व्योमानुवृत्तिरधुना कथं
न व्याहतं वचः ३२ कथं व्योमानुवृत्तिरधुनोच्यत इति शेषः ३१ पूर्वमवकाशलक्षणानुवृत्तिर्निवारिता ऽधुना तु ध्वनिस्त्वनुवृत्तिरभिधीयते मः
स्वरूपानुवृत्तिरतो न व्याहतिरिति परिहरति छिद्रानुवृत्तिर्नेतीति पूर्वोक्तिरधुनाश्रियः शब्दानुवृत्तिरेवोक्ता वचसी व्याहतिः कुतः ३२ ननु

पं.
द.
वि.
१

नास्तीति वदतो दोषमाह भिन्नस्तोऽसत्त्वेनेति वक्तुं चेद्ब्रहतितत्र ९ अथ तद्विभागं नत्वादित्याशंक्य सर्वं च लक्षणमाह ज्ञानं न विरुद्ध्यते
इत्याह भातीति चेद्रज्जुनामभूषणं मायिकसत्तत् न सविरोधं दर्शयितुं मिथ्यावस्तुनो लक्षणं सदृष्टान्तमाह यदसद्भासमानं तन्मिथ्या
स्वप्नगजादिवत् १० यद्वस्तु स्वरूपेणाविद्यमानमपि भासते तत्स्वप्नगजादिवन्मिथ्येत्यर्थः १० ननु नियमेन सहोपलभ्यमानयोर्भेदो
न दृष्टचर इत्याशंक्याह जातिव्यक्ती देहिदेही गुणद्रव्ये पृथग्यथा वियत्सत्ते तथैवात्र पार्थक्ये कोऽत्र विस्मयः ११ भेदो यद्यपि बुद्धौ ते
तथापि न निश्चितो भवतीत्याशंक्य ते बुद्धावपि भेदो नो चित्ते निरूढिं याति चेत्तदा तस्य परिहारं वक्तुं निश्चयाभावे कारणं पृच्छति अनैकाग्र्यात्सं
शयाद्वा रूढ्यभावोऽस्य तेऽवद १२ आद्ये परिहारमाह अप्रमत्तो भव ध्यानादाद्ये आद्ये प्रथमे विकल्पे ध्यानेनैकाग्र्यप्राप्त्यर्थं वस्तुनि तत्र ध्यान
मित्युक्तलक्षणाद्ध्यानादप्रमत्तो भव सावधानमना भवेति यावत् द्वितीये परिहारमाह अन्यस्मिन्विवेचनं कुरु प्रमाणयुक्तिभ्यां ततः किं
मित्यत आह ततो रूढतमो भवेत् १३ ततोऽपि किमित्यत आह ध्यानान्मानाद्युक्तितोऽपि रूढे भेदे वियत्सतोः न कदाचिद्वियत्सत्यं सद्वस्तु
छिद्रवन्न च १४ ध्यानं पूर्वोक्तलक्षणं मानं वियत्सतोर्भिन्ने शब्दभेदाद्धेतुभेदतश्रवणेन युक्तिस्तु सद्वस्तुत्वपिकरणत्वादित्यादिरूपा
एतैर्ध्यानादिभिर्वियत्सतोर्भेदे चित्ते निरूढिं याते सति वियत्कदाचिन्न सत्यं किंतु सर्वदा मिथ्यैव भासते सद्वस्त्वपि छिद्रवदाकाशवन्न चैवं
व भवतीति शेषः १४ वियत्सत्त्वविवेचनस्य फलमाह जस्वभाति सदा व्योम निस्तत्त्वं लेखपूर्वकं सद्वस्त्वपि विभात्यस्मान्नेच्छिद्रत्वपुरस्स
रं १५ वियन्मिथ्यात्वं सत्तो वस्तुत्वं च सदा चिंतयतः किं भवतीत्यत आह वासनायां प्रवृद्धायां वियत्सत्यत्ववादिनं सन्मात्रावबोधयुक्तं च दृ

३

१

तः अन्यथात्वं भ्रमेणेति न्यायोयं सर्वलौकिकाः ६४ यद्वस्तु स्वादि यथा येन शुक्तिकादिरूपेण वर्त्तते तस्य तत्पात्वं शुक्त्यादिरूपत्वं भ्रमात्तः स्फु
रति अन्यथात्वं रजतादिरूपत्वं भ्रांत्या तद्भ्रमेण प्रतिभातीत्ययं न्यायं सर्वलौकिकः सर्वलोकप्रसिद्ध इत्यर्थः ६५ एवं भ्रांत्या विपरीततया प्र
तिभानं दर्शयित्वा तन्निवृत्त्युपायमाह एवं श्रुतिविचारात्प्रागयथावद्वस्तु भासते विचारेण विपर्येति ततस्तच्चिंत्यतां वियत् ६६ एवमुक्तप्र
कारेण श्रुतिविचारात्प्राक् श्रुत्यर्थविचारात्पूर्वं यद्वस्तु यस्य स्वरूपं ब्रह्म भ्रांत्या यथायेन गगनादिरूपेण वर्त्तते भासते तत्तु श्रुत्यर्थपर्यालोचने
न विपर्येति गगनादिभावं परित्यज्य सद्रूपं ब्रह्मैव भवति ततः श्रुतिविचारेण वस्तुयाथात्म्यदर्शनसंभवात्तद्वियच्चिंत्यतां विचार्यतामित्यर्थः
६६ विचारस्वरूपमेव दर्शयति भिन्ने वियन्मती भिन्ने इति प्रतिज्ञातार्थे हेतुमाह सद्रूपभेदात्तु वियद्रूपयोरपर्यायत्वादित्यर्थः हेत्वंतरमा
ह बुद्धिभेदतः तमेव हेतुं विशदयति वाय्वादिष्वनुवृत्तं सन्न तु व्योमेति भेदधीः ६७ सद्भावादिषु भूतेषु सत्त्वा वायुः सत्तेजः इत्येवं प्रकारेण
अनुवृत्तं भासते व्योम तु नैवं भासत इति यज्ज्ञानं स भेदधीर्भेदबुद्धिरित्यर्थः ६७ एवं सदाकाशयोर्भेदं प्रसाध्य व्योम्नः सत्तेति भ्रांत्या प्रतीतस्य ध
र्मिधर्मभावस्य विचारेण व्यत्ययं दर्शयति सद्वस्त्वधिकवृत्तित्वाद्धर्मि व्योमस्तु धर्मिता रूपरसादिष्वनुवृत्तस्य द्रव्यस्यैवाकाशवाय्वादिष्वनुवृ
त्तस्य सतो धर्मित्वं रसादिभ्यो व्यावृत्तस्य रूपस्येव वाय्वादिभ्यो व्यावृत्तस्य नभसो धर्मत्वमित्यर्थः ननु तर्हि घटाद्भिन्नस्य रूपस्य यथा वास्तवत्वं भि
न्नस्य नभसोपि सद्वादित्याशंक्य सद्व्यतिरिक्तस्य नभसो दुर्निरूपत्वान्नैवमित्याह धियासतः पृथक्कारे ब्रूहि व्योम किमात्मकं ६८ दुर्निरूपत्व
मसिद्धमिति शंकते अवकाशात्मकं तच्चेत् तर्हि सतो विलक्षणत्वादसत्त्वस्यासिद्धिमिति परिहरति असत्तदिति यतो सतो विलक्षणस्यासत्त्वं

तत्स्वरूपमाह सोवकाशस्वरूपवान् आकाशस्य ब्रह्मकार्यत्वे हेतुमाह आकाशेऽस्तीति सत्तत्त्वमाकाशेऽप्यनुगच्छति ॥ ६० ॥ ततः किमित्यत आ
ह एकस्वभावं सत्तत्त्वमाकाशो द्विस्वभावकः उक्तमर्थं विशदयति नावकाशः सति व्योम्नि स चैषोऽपि द्वयं स्थितं ॥ ६१ ॥ सति सद्वस्तुन्यवकाशो
नास्ति किंतु सत्स्वभाव एक एव आकाशे तु सच्च सत्स्वभावश्च सोऽप्यवकाशस्वभावोऽपीति द्वयं स्थितं विद्यत इत्यर्थः ॥ ६१ ॥ यद्वाकाशस्यैकद्वि
स्वभावत्वं प्रकारांतरेण व्युत्पादयति यद्वा प्रतिध्वनिर्व्योम्नो गुणो नासौ सतीक्ष्यते व्योम्नि द्वौ सद्ध्वनी तेन सदेकं द्विगुणं वियत् ॥ ६२ ॥ प्रतिध्वनि
र्व्योम्नो गुण इत्युपपादितमथ श्लोकः असौ प्रतिध्वनिः सति सद्वस्तुनि नेक्ष्यते नोपलभ्यते व्योम्नि तु सद्ध्वनी सद्रूपानुभावप्युपलभ्येते तेन
प्रकारेण सदेकमेकस्वभावं वियद्द्विगुणं द्विस्वभावकमित्यर्थः ॥ ६२ ॥ नन्वाकाशस्य सद्वस्तुकार्यत्वे आकाशस्य सत्त्वेनेति सत्त आकाशाद्धर्मिताकु
तः प्रतिभातीत्याशंक्याह या शक्तिः कल्पयेद्व्योम सा सद्व्योम्नोरभिन्नतां आधाराधेयधर्मित्वं व्यत्ययेनावकल्पयेत् ॥ ६३ ॥ या माया सद्वस्तुन्याका
शं कल्पयति सा प्रथमतः सद्व्योम्नोरभेदं कल्पयति पश्चादुक्तं धर्मधर्मिभावं वैपरीत्येन कल्पयति अत आकाशस्य सत्त्वेनेति भानमुपपद्यत इ
त्यर्थः ॥ ६३ ॥ मायया वैपरीत्यं कथं कृतमित्याशंक्याह सतो व्योमत्वमापन्नं व्योम्नः सत्तां तु लौकिकाः तार्किकाश्चावगच्छंति वस्तुतस्तत्त्वविचा
रे क्रियमाणे मृदो घटरूपत्वमिव सतो व्योमत्वमापन्नं सद्वस्तुनस्त्वाकाशरूपत्वं प्राप्तं लौकिकाः प्राणिनः शास्त्रिणस्तार्किकाश्च तद्वैपरीत्येन व्योम्नो
गगनस्य धर्मिणः सत्तां सद्रूपत्वं धर्मं जानंति वा च गच्छंति नन्वन्यस्यान्यथाप्रतीतिरनुपपन्नेत्याशंक्याह मायायाउचितं ह्येतत् ॥ ६४ ॥ तद्विपरीतद
र्शने हेतुत्वं मायाया युक्तमित्यर्थः ॥ ६७ ॥ मायया विपरीतप्रतीतिहेतुत्वं लौकिकन्यायदर्शनेन स्पष्टयति यद्यथा वर्तते तस्य तथात्वं भाति मान

कते शक्त्याधिक्ये जीवितं चेद्वर्धते निरस्ताक्ति जीवितवर्द्धने कारणमपि तु तत्कार्यं युद्धकरणमस्तीति परिहरति नचेद्धि कृत् नशक्तिः किंतु त
त्कार्यं हेतुर्युद्धकरणादिकं ५२ दार्ष्टान्तिके योजयति सर्वशक्तिमात्रस्य न पृथग्मानं नास्ति चित् माभूत्तथापि सद्वितीयत्वं हेतोपि तु तत्कार्ये
ण भवत्येवेत्याशंक्य तस्य तदानीमसत्वान्नेति नापि सद्वितीयत्वमित्याह शक्तिकार्यं तु नैवास्ति द्वितीयं शंक्यते कथं ५३ ननु सच्छक्तिः सतिम
वैनवर्तते उतैकदेशे नाद्यः मुक्तेः प्राप्यवस्त्वभावप्रसंगात् नद्वितीयः निरंशत्वेन विरोधित्वादित्याशंक्याद्यानंगीकाराद्द्वितीये परिहारो
वदपत्तत्त्वमिति प्रायेणाह न कृत्स्नब्रह्मवृत्तिः सा शक्तिः किंत्वेकदेशभाक् एकदेशवृत्तौ दृष्टान्तमाह घटशक्तिर्यथा भूमौ स्निग्धमृद्येव वर्तते
५४ शक्तेरेकवृत्तित्वे दृष्टान्तमाह पादोस्य विश्वाभूतानि त्रिपादस्यामृतं प्रभुः एकदेशवृत्तिर्मायायावदिति श्रुतिः ५५ नकेवलं श्रुति
रेव स्मृतिरप्यस्तीत्याह विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् इति कृष्णोऽर्जुनायाह जगत्त्वेकदेशतां ५६ इदानीं निरंशत्वस्वरूपम
भावे प्रमाणमाह सभूमिं विश्वतो वृत्वा ह्यत्यतिष्ठद्दशांगुलं विकारावर्ति चास्यास्ति श्रुतिसूत्रकृतोर्वचः ५७ विकारावर्ति च तथा हि स्थितमा
हेति सूत्रकारवचनमित्यर्थः ५७ तर्हि निरंशत्वे विरोधस्य कः परिहार इत्याशंक्यावास्तवनिरंशत्वाभ्युपगमात्तत्र विरोध इत्यभिप्रायेण
दाहृतश्रुत्यभिप्रायमाह निरंशेप्यंशमारोप्य कृत्स्नेंशे वेति पृच्छतः तद्भाषयोत्तरं ब्रूते श्रुतिः श्रोतृहितैषिणी ५८ यद्यपि ब्रह्मणि मायासमन्वि
तात्तदिदानीमाह सत्तत्त्वमाश्रिता शक्तिः कल्पयेत्सति विक्रियाः विक्रिया विविधत्वेन क्रियन्त इति विक्रियाः कार्यविशेषा इत्यर्थः तत्र दृष्टान्तमाह
वर्णाभित्तिगता भित्तौ नानाविधं यथा ५९ वर्णा रक्तपीतादयः धातुविशेषाः ५९ तत्र प्रथमं धातुविशेषं दर्शयति आद्यो विकार आकाशः

चित्रं

6.

पं॰
भू॰
वि॰
५

यणभूतात्सद्वस्तुनः पृथक्त्वस्वरहिता कार्यगम्या [illegible] यदादिकार्यलिंगगम्या अस्य सद्वस्तुनः शक्तिर्वि॰ आदिकार्यजननसामर्थ्यमा
येत्युच्यते वस्तुस्वरूपातिरिक्तशक्तिसद्भावे दृष्टांतमाह अग्नेः शक्तिवदिति यथा अग्नेर्दाहस्वरूपातिरिक्तं स्फोटादिकार्यलिंगगम्यं वह्न्या
दिनिष्ठं सामर्थ्यमस्ति तद्वदित्यर्थः शक्तेः कार्यलिंगगम्यत्वं व्यतिरेकमुखेन द्रढयति नहि शक्तिः क्वचित्केनचिद्बुध्यते कार्यतः पुरा ४७
एवं शक्तेः कार्यलिंगगम्यत्वमुपपाद्य निस्तत्त्वरूपतामुपपादयति न सद्वस्तु सतः शक्तिः अयमभिप्रायः सद्वस्तुनः शक्तिः किं सतीउ
तासती सती वाऽसती तत्राद्ये सतो भिन्नत्वेन तच्छक्तित्वायोगात् उक्तार्थे दृष्टांतमाह नहि वह्नेः स्वशक्तिता द्वितीयेपि किं नरविषाणतु
ल्या उत सद्विलक्षणेति विकल्पाभिप्रायेण पृच्छति सद्विलक्षणतायां तु शक्तेः किं तत्त्वमुच्यतां ४८ तत्राद्यं पक्षमनूद्य दूषयति शून्यत्व
मिति चेच्छून्यं मायाकार्यमितीरितं शून्यस्य नामरूपे च तथा चेज्जीवतां चिरं नित्यत्वं पूर्वमीरितमित्यर्थः तस्माद्द्वितीयः पक्षः परिशिष्य
त इत्याह न शून्यं नापि सद्यादृक्तादृक्तत्त्वमिहेष्यतां ४९ मायायाः स्वरूपं सद्वा असद्वा [illegible] निर्वचनानर्हमित्यभिप्रायः ४९ अस्मिन्नर्थे श्रुतिं
प्रमाणयति नासदासीन्नो सदासीत्तदानीं किंत्वभूत्तमः तम आसीत्तमसा गूढमग्र इत्यादिश्रुतिः प्रमाणमित्यर्थः तर्हि तम आसीदिति कथं
सत्त्वमुच्यत इत्यत आह सद्योगात्तमसः सत्त्वं न स्वतः कुत इत्यत आह तन्निषेधनात् ५० फलितमाह अत एव द्वितीयत्वं शून्यवन्नहि गण्य
ते यतः स्वतः सत्त्वं मायाया नास्त्यत एव शून्यस्येव मायाया अपि द्वितीयत्वं नहि गण्यते नैवाङ्गीक्रियत इत्यर्थः अन्नतस्य द्वितीयस्यानंगीकारे
दृष्टांतमाह न लोके चैवं तद्वत्सोऽर्थो जीवितं गण्यते पृथक् ५१ ननु सत्त्वाधिके जीवितात् अधिकं दृश्यते नः शक्तेरपि पृथग्जीवितत्वमस्त्वेवेति शं ५

7

तेजस्तेजस्त्वानधिकरणं नतमः सोविलक्षणं ज्ञानावरणस्वभावं तत्तद्व्याप्तं ज्ञानावभासाद्यात्तु मयाकाममनसिव्यक्तं च रूपादिभिर्वि
षयीकृतं सच्छून्यविलक्षणं अतएव वर्किंचिदिदं तत्या निर्दिष्टुमशक्यं अवशिष्यते द्वैतनिषेधावधित्वेनावशिष्टत्वं तत्॥ ७० ननु जनित
त्वेनानित्यस्य भूम्यादेर्नसत्त्वमस्तु नित्यस्याकाशस्यासत्त्वं कथमंगीक्रियतइति शंकते ननु भूम्यादिकं माभूत्परमाणवंतनाशतः कथं तेवि
यतोसत्त्वं बुद्धिमारोहतीतिचेत् ७१ दृष्टांतावष्टंभेन परिहरति अत्यंतनिर्जराद्व्योमयथा तेबुद्धिमाश्रितं तथैव सन्निराकाशकथं नाश्रयते
मतिं ७२ अत्यंतनिर्जरगजन्मादिरहितमित्यर्थः ७२ नहि दृष्टेनुपपन्नमितिन्यायमाश्रित्यचोदयति निर्जराद्व्योमदृष्टं चेत् दर्शनमेवा
प्रसिद्धमितिस्वयति प्रकाशातमसो विना क्व दृष्टं अप्रसिद्धं तो यदित्याह किंचतेपक्षेनप्रत्यक्षं वियत्खलु ७३ ननु दर्शनाभावेप्यस्तुन्य
पि ससतः इत्याशंक्यसतः सर्वानुभवसिद्धत्वान्नैवमित्याह सद्वस्तु शुद्धतया माभिर्निश्चितैरनुभूयते तूष्णींस्थितौ ननुतूष्णींस्थितौ शून्य
स्यैव तत्स्वरूपस्यापि प्रतीत्यभावादित्याशंक्य शून्यप्रतीत्यभावाच्छून्यमपि न संभवतीत्याह न शून्यत्वं शून्यबुद्धेर्विवर्जनात् ७४ ननु त
र्हि सद्बुद्ध्यभावात्सत्त्वमपि न घटत इति शंकते सद्बुद्धिरपिचेन्नास्ति नस्यात्स्वप्रकाशत्वान्न बुद्ध्यभावो निष्ठ इति परिहरति मास्त्वस्वप्रभ
त्वतः सूक्ष्मोहं त्वबुद्ध्यभावे कथं सद्वस्तु वक्तुं शक्यत इत्यत आह निर्मनस्कत्वसाक्षित्वात्तन्मात्रं सुगमं नृणां ७५ एवं निष्प्रपंच सत्स्वरूपमुक्त्वा
तूष्णींस्थितौ भानं एतद्रूपं तद्दृष्टं त्वेन स्पष्टेपि तथापि सद्वस्तुतत्त्वावगंतुं शक्यत इत्याह मनोजृंभणराहित्ये यथा साक्षी निराकुलः मा
याजृंभणतः पूर्वं सत्तथैव निराकुलं ७६ मायायाः किं लक्षणमित्यत आह निस्तत्त्वा कार्यगम्यास्य शक्तिर्मायाग्निशक्तिवत् निस्तत्त्वा जगत्का

8

पं॰
भू॰
वि॰
४

सतिअथवा जगति त्वयः अन्यस्य रजतादेर्नामरूपयोरन्यत्र शुक्तिकादावारोपदर्शनात् सतो नामरूपयोः सत्यकल्पनायोगात् नद्वि
तीयः असतो निरात्मकस्याधिष्ठानत्वायोगात् न तृतीयः सत उत्पन्नस्य जगतः सन्नामरूपकल्पनाधिष्ठानत्वानुपपत्तेरिति माभूदु
धिष्ठानमनयोः कल्पना किं न स्यादित्याशंक्याह निरधिष्ठानो न भ्रमः क्वचिदीक्ष्यते ३५ ननु सदेवेदमग्र आसीदित्यत्र यथा व्याख्यातं तदु
तत्त्वया सदेव सोम्येदमग्र आसीदित्यत्रापि दोषोऽस्तीति शंकते सदासीदिति शब्दार्थभेदे वैगुण्यमापतेत् अभेदे पुनरुक्तिः स्यात् तथाऽ
दि सदासीदिति शब्दभेदयोरर्थभेदोऽस्ति वा न वा अस्ति चेद्द्वैतहानिः नास्ति चेत्पुनरुक्तिः स्यात् अतः सदासीदित्यनुपपन्नमिति द्वि
तीयपक्षमादाय परिहरति मैवं पुनरुक्तदोषस्य कः परिहार इत्याशंक्याह लोकैस्तथेक्षणात् ३६ लोके एवंविधेषु प्रयोगेषु पुनरुक्त्य
भावः कुत्र दृष्ट इत्याह कर्त्तव्यं कुरुते वाक्यं ब्रूते धार्यस्य धारणं भवत्येवं लोके श्रुतौ किमायातमित्यत आह इत्यादिवासनाविष्टं प्रत्यासीत्सदि
तीरणं ३७ नन्वद्वितीये वस्तुनि भूतकालाभावादग्र आसीदिति युक्तिरनुपपन्नेत्याशंक्याह कालाभावे पुरेत्युक्तिः कालवासनया श्रुतं शिष्यं
प्रत्येव ननु जगद्रूपवत्तेः पुरा जगद्भावेन सद्वितीयत्वं ब्रह्मण इत्याशंक्य श्रुतिप्रवृत्तेर्द्वैतवासनाविष्टस्योत्प्रतिबोधनार्थत्वान्नाति शंकनीयमि
त्याह तेनाद्वितीयं न हि शंक्यते ३८ इदानीं सिद्धान्तरहस्यमाह चोद्यं परिहारो वा क्रियतां द्वैतभाषया अद्वैतभाषया चोद्यं नास्त्यनापि तद्दने
रं ३९ व्यवहारदशायां चोद्यादिकं नैवं परमार्थतोऽद्वैतमेव तत्त्वमित्यर्थः ३९ परमार्थतो द्वैताभावे स्मृतिं प्रमाणयति तदा स्तिमितगंभी
रं न तेजो न तमस्ततं अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते ४० न तदास्तिमितं निःशब्दं गंभीरं दुरवगाहं मनसा विषयीकर्तुमशक्यं न

तं भयमूचिरे १८ केन वाक्येन तौ नैवं ततः इत्याकांक्षायां तदीयवार्त्तिकमेव पठति अस्पर्शयोगो नामैष दुर्दर्शः सर्वयोगिभिः योगमस्प
र्शयोगो निर्विकल्पः समाधिः एष सर्वयोगिभिः साकारध्याननिष्ठैर्दुर्दर्शो दुःखेन द्रष्टुं योग्यो दुष्प्राप्य इत्यर्थः अत्रोपपत्तिमाह योगिनो वि
भ्यति ह्यस्मादभये भयदर्शिनः १९ ह्यस्मात्कारणाद्योगिनः पूर्वोक्तद्वैतदर्शिनः अभये भयशून्ये समाधौ बिभ्यति निर्जनेऽरण्ये बाला इव भयद
र्शिनो भयहेतुं विकल्पयन्तः अस्माद्योगाद्भीतिं प्राप्नुवन्ति १९ श्रीमदाचार्यैरप्येतदभिहितमित्याह भगवत्पूज्यपादाश्च शुष्कतर्कपटू
नमून् प्राहुर्माध्यमिकान्भ्रान्त्यानचिन्त्येऽस्मिन्सदात्मनि २० तद्वार्त्तिकं पठति अन्य... श्रुतिमोहादिमे बौद्धास्तमसि विनः प्रापेदिरे निरा
त्मत्वमनुमानैकचक्षुषः २१ इदानीमपक्षान्तरं विकल्प्य दूषयति शून्यमासीदिति वृषभस्याग्रं गवां वा महदात्मतां शून्यस्य मनुजाद्यं नु भयं तदाह
तवतः २२ शून्यमासीदित्यं तेन वाक्येन शून्यस्य सत्ताजातियोगं वा सद्रूपतां वा ब्रूषे इति विकल्प्यार्थः तदुभयं सत्तासंबंधः सद्रूपत्वं च शून्य
स्य वक्तुं न युज्यत इत्यर्थः २३ व्याहतत्वमेव दृष्टान्तेन द्रढयति न युक्तं तमसा सूर्यो नापि चासौ तमोमयः सच्छून्ययोर्विरोधित्वाच्छू
न्यमासीत्कथं वद २४ ननु भवन्मतेऽपि वियदादीनां निर्विकल्पे ब्रह्मणि सत्त्वं व्याहतमित्याशंक्याह वियदादेर्नामरूपे मायया सुविकल्पिते
तर्हि शून्यस्यापि नामरूपे सद्वस्तुनि विकल्पिते इति वदतो बौद्धस्यापसिद्धान्त इत्यभिप्रायेणाह शून्यस्य नामरूपे च तथा चेज्जीव्यतां चिरं २५
ननु तर्हि शून्यस्येव सद्वस्तुनोऽपि नामरूपे कल्पिते एवांगीकर्तव्ये भवन्मते वास्तवयोर्नामरूपयोरभावादिति शंकते सतोऽपि नामरूपे द्वे क
ल्पिते चेत् विकल्प्यासत्वाद्वयं वदा एवानुपपन्न इत्यभिप्रायेण परिहरति तदा वद कुत्र ते इति अयमभिप्रायः ... नामरूपे किं सति कल्पिते उत

२ सतो नावयवाः शंक्यास्तदंशस्यानिरूपणात् नामरूपयोः सदवयवत्वं किं न स्यादित्याशंक्य सृष्टेः पुरा तयोरभावान्न सदंशत्वमित्याह नामरू
पे न तस्यांशौ तयोरद्याप्यनुद्भवात् २२ कुतो नामरूपयोरभाव इत्याशंक्याह नामरूपोद्भवस्यैव सृष्टित्वात्सृष्टितः पुरा न तयोरुद्भवः फलि
तमाह तस्मान्निरंशं तद्यथा वियत् २३ अत्रायं प्रयोगः सद्वस्तु स्वगतभेदशून्यं भवितुमर्हति निरवयवत्वाद्गगनवदिति २३ माभूत्स्वग
तभेदः सजातीयभेदः किं न स्यादित्याशंक्य तत्सजातीयं सदन्तरमिति न वक्तव्ये न तन्निरूपयितुं शक्यते सतो वैलक्षण्याभावादित्याह सदन्तरं
सजातीयं न वैलक्षण्यवर्जनात् ननु घटसत्ता पटसत्तेति सतो भेदः प्रतिभासत इत्याशंक्य घटाकाशमठाकाशवदौपाधिको भेदो न सतो भा
तीत्याह नामरूपोपाधिभेदं विना नैव सतो भिदा २४ अत्रायं प्रयोगः सद्वस्तु सजातीयभेदरहितं भवितुमर्हति उपाधिपरामर्शमन्तरेण
विभाव्यमानभेदत्वाद्गगनवदिति २४ भवतु तर्हि विजातीयाद्भेद इत्याशंक्यासतो विजातीयमसतस्तस्यासत्त्वेनैव प्रतियोगित्वासंभवात्तत्प्रति
योगिकोऽपि भेदो नास्तीत्याह विजातीयमसत्तत्तु न खल्वस्तीति गम्यते नास्यातः प्रतियोगित्वं विजातीयाद्भिदा कुतः २५ फलितमाह एकमे
वाद्वितीयं सत्सिद्धं इदानीं श्रुत्यानिरुक्तेन न्यायेन सद्वैतमेवं दृढयितुं पूर्वपक्षमाह अत्र केचन विह्वला असदेवेदं पुरासीदित्यवर्णय
न् २६ विह्वलत्वे दृष्टान्तमाह मग्नस्याब्धौ यथाक्षाणि विह्वलानि दार्ष्टान्तिके योजयति तथास्य धीः अखण्डैकरसं श्रुत्वा निष्प्रचारा बिभेत्यतः
२७ अस्या महाविह्वलो जातावेकल्पनं धीरन्तःकरणमखण्डैकरसं वस्तु श्रुत्वा निष्प्रचाराऽत्माकारवस्तुनी वाखण्डैकरसे दृश्यनिष्प्रचाररहिता
सती अतोऽस्माद्वस्तुनो बिभेति २७ उक्तार्थे गौडाचार्यसंमतिं दर्शयति गौडाचार्या निर्विकल्पे समाधावन्ययोगिनां साकारब्रह्मनिष्ठानामसं

यं सोम्य मनः आपोमयः प्राणः तेजोमयी वागित्यादि श्रुतं अनुमानं च विमतानि श्रोत्रादीनि भूतकार्याणि भवितुमर्हन्ति भूतान्वयव्य
तिरेकानुविधायित्वात् यद्यदन्वयव्यतिरेकानुविधायि तत्तत्कार्यं दृष्टं यथा मृदन्वयव्यतिरेकानुविधायी घटो मृत्कार्यो दृष्टः तथा चे
मानि तस्मात्तथेति तदन्वयव्यतिरेकानुविधायित्वं च षोडशकलः सोम्य पुरुष इत्यादिना छांदोग्यश्रुतौ मनसः श्रुतं तद्वदन्येषामपि द्रष्ट
व्यं १७ एवंभूतानि भौतिकानि च विविच्य इदानीं प्रकृतां सदेव सोम्येदमग्र आसीदित्याद्यद्वितीयब्रह्मप्रतिपादिकां श्रुतिं व्याचक्षाण
स्तद्वाक्यस्थेदंपदस्यार्थमाह एकादशेन्द्रियैर्युक्त्या शास्त्रेणाप्यवगम्यते यावत्किंचिद्भवेदेतदिदंशब्दोदितं जगत् १८ प्रत्यक्षादिभिः स
र्वैः प्रमाणैरशेषशब्दादिविषयप्रमाणज्ञानेन यावत्किंचिज्जगदवगम्यते तत्सर्वमिदमेवेत्यादिवाक्यस्थेनेदंपदेनाभिहितमित्यर्थः १
८ एवमिदंशब्दस्यार्थमभिधायेदानीं तां श्रुतिं स्वयमेवमर्थतः पठति इदं सर्वं पुरा सृष्टेरेकमेवाद्वितीयकं सदेवासीन्नामरूपे नास्तामित्या
रुणेर्वचः १९ आरुणेरपत्यमारुणिरुद्दालकस्तस्य वचनमित्यर्थः १९ एकमेवाद्वितीयमिति पदत्रयेण सद्वस्तुनि स्वगतादिभेदत्रयं
प्रसक्तं निवारयितुं लोके स्वगतादिभेदत्रयं तावद्दर्शयति वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः वृक्षान्तरात्सजातीयो विजातीयः शिला
दितः २० एवमन्यात्मनि भेदत्रयं प्रदर्श्य सद्वस्तुन्यपि प्रसक्तं तद्भेदत्रयं श्रुतिर्निवारयतीत्याह तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते ऐक्या
वधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात् २१ वस्तुत्वसामान्यादन्यात्मनीव सद्रूपात्मन्यपि प्रसक्तं स्वगतादिभेदत्रयं ऐक्यावधारणद्वैतप्रतिषेधा
भिधायकैरेकमेवाद्वितीयमि[illegible]तैः क्रमेण निवार्यत इत्यर्थः २१ सद्वस्तुनः स्वावयवकृतस्वगतभेदः शंकितुं न शक्यते निरवयवत्वादित्या

१२

पं. सू. वि. २

रत्येनु दर्शितत्वात्सिद्धे इत्य्रहोते ११ [illegible] इन्द्रियप्रेरकत्वेन प्रसक्तं तस्य मनसः स्वरूपं स्थानं च दर्शयति मनः पदेशं इन्द्रियाध्यक्षं हृत्पद्मगोल
केस्थितं तस्यान्तरिन्द्रियत्वं सदिभिन्नकमाह तेनान्तःकरणं बाह्येषु स्थितं माहुरिन्द्रियैः १२ इन्द्रियाध्यक्षत्वमेव दर्शयति अनेषु धावि
तेषु तद्गुणदोषविचारकं अन्तेषु इन्द्रियेषु धावितेषु विषयेषु स्थापितेषु स्वस्तु दृशा सेतन्मनो गुणदोषविचारकमिदं समीचीनमिदमसमी
चीनमिति गुणादिविचारकारीत्यर्थः अयं भावः आत्मनः प्रमातृत्वेन सर्वज्ञानसाधारणत्वं चक्षुरादीनां च रूपादिज्ञानजननमात्रे चरिता
र्थत्वात् गुणदोषविचारस्योपलभ्यमानस्यान्यथानुपपत्त्यान्तःकरणत्वेन मनोऽभ्युपगन्तव्यमिति मनसोऽवैराग्यकामाद्यनेकविधत्व
त्वाभावं दर्शनाय सत्त्वादिगुणत्वं दर्शयति सत्त्वं रजस्तमश्चास्य गुणाः तेषां तद्गुणत्वे कारणमाह विक्रियन्ते हितैः १३ गुणैस्तु स विक्रियमा
णमनस्त्वमेव दर्शयति वैराग्यं क्षान्तिरौदार्यमित्याद्याः संभवाः कामक्रोधौ लोभयत्नावित्याद्या रजसोत्थिताः १४ आलस्यभ्रान्तितन्द्राद्या वि
कारास्तमसोत्थिताः वैराग्यादीनां कार्याणि विभज्य दर्शयति सात्त्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः १५ तामसैर्नोभयं किन्तु वृथा
युःक्षपणं भवेत् तेषां बुद्धिस्थत्वादन्तःकरणादीनां सर्वेषां स्वामिनमाह अत्राहं प्रत्ययी कर्तेत्येवं लोकव्यवस्थितिः १६ अत्राहमिति प्रत्य
यवान्कर्ता प्रभुरित्यर्थः लोकेऽपि कार्यकर्ता प्रभुरित्येवं व्यपदिश्यते १७ एवं जगतः स्थितिमभिधायेदानीं तस्य भौतिकत्वं तत्र प्रत्यक्षोपायमा
ह स्पष्टशब्दादियुक्तेषु भौतिकत्वमस्फुटं स्पष्टशब्दादियुक्तेषु स्पष्टैः शब्दादिगुणैर्युक्तेषु घटादिवस्तुषु भूतत्वं [illegible] स्पष्टमेवावग
म्यते नत्विन्द्रियादिषु कथं भूतकार्यत्वनिश्चय इत्यत आगमानुमानाभ्यामित्याह अदादौ [illegible] आगमस्य युक्तिभ्यामस्य धार्यतां १८ अनन्तम

13

सत

२

रिगोलकस्थं तत्तद्रूपादिग्राहकं च मनोऽर्थे इंद्रियसद्भावे किं प्रमाणमित्याकांक्षायां कार्यलिंगकानुमानमित्याह सोहम्यात्कार्यानुमेयं तानि

तत्तद्रूपोपलब्धिः करणजन्या क्रियात्वात् छिदिक्रियावदित्यादि द्रष्टव्यं सोहम्यादपंचीकृतभूतकार्यत्वेन दुर्लभत्वादित्यर्थः प्राणोप्यंतेवेद

हि मुदं ७ पराचि खानि व्यतृणत्स्वयंभूरिति श्रुतेः ७ प्रायः शब्देन क्वचित्कदाचित्करणानामांतरविषयग्राहकत्वं दर्शयति कदाचिदिति

तेकर्णौ श्रूयते शब्द आंतरः प्राणवायोर्जाठराग्नेर्जलपाने भक्षणे ८ व्यज्यंते ह्यांतराः स्पर्शा मीलने चांतरं तमः उद्गारे रसगंधौ चेत्यक्षाणा

मांतरग्रहः ९ कदाचित्कर्णस्य पिधाने कृते सति प्राणवायोर्जाठराग्नेश्च विद्यमानः आंतरः शब्दः श्रूयते जलपाने च भक्षणे चांतराः स्पर्शा

अभिव्यज्यंते अभिव्यक्ता भवंति नेत्रनिमीलने कृते आंतरं तमः उपलभ्यते उद्गारे जाते रसगंधौ ह्यांतरौ गृह्येते इत्यनेन प्रकारेण करणानामांतरग्रहः

करणानामिति कर्तरि षष्ठी आंतरस्य विषयस्य ग्रहो ग्रहणमिंद्रियकर्तृकमांतरविषयग्रहणं भवतीत्यर्थः ९ एवं ज्ञानेंद्रियव्यापारानभिधाय क

र्मेंद्रियाणां तद्व्यापारं प्रतिजानीते तत्सद्भावसमर्थनाय तल्लिंगभूतांस्तद्व्यापारानाह पंचोक्त्यादानगमनविसर्गानंदकाः क्रियाः उक्तिश्चादानं च ग

मनं च विसर्गश्चानंदश्चेति द्वंद्वसमासः उक्त्यादानगमनविसर्गानंदाख्याः पंच क्रियाः प्रसिद्धा इति शेषः ननु कर्त्रादीनां क्रियासु करणमपि

सन्नातव्यं पंचेतु त्वमित्याशंक्याह कृषिवाणिज्यसेवाद्याः पंच स्वंतर्भवंति हि १० कानि तानि क्रियाजनकानींद्रियाणीत्यत आह वाक्पा

णिपादपायूपस्थैरेतैस्ताः क्रियाजनिः वागादिभिरेतैस्ताः क्रियाजनिस्तासां क्रियाणामुत्पत्तिर्भवतीति शेषः अत्रापि युक्तिः करणपूर्विका क्रि

यात्वादिति कार्यलिंगकमनुमानं ... इंद्रियपंचकस्य स्थानान्याह मुखादि गोलके स्थानेनत्कर्मेंद्रियं च ११ आदिशब्देन करच

२१

थ निर्विकल्पकसमाधिरूपमर्थं महिम्ना प्रतिपाद्याय न्यदूपयन्निरूपितवान् ५८ अस्य समाधेरवांतरभेदमाह अनादाविह संसा
रे संचिताः कर्मकोटयः अनेन विलयं यांति शुद्धो धर्मो विवर्द्धते ५९ अनादौ स्पष्टे इह संसारे संचिताः संपादिताः कर्मकोटयः कर्मणां पु
ण्यपापरूपाणां [illegible] संस्कारूपाणां वा कोटयः स्तुपलक्षणमपरिमितानि कर्माणीत्यर्थः अनेन समाधिना विलयं यांति विनश्यंति ह्नीयंते चास्य कर्माणि त
स्मिन्दृष्टे परावरे इति श्रुतेः ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन इति स्मृतेश्च शुद्धो धर्मः स विलासो ह्यानिवर्त्तकमात्मतत्त्वं ततो विवर्द्धते
[illegible] ५९ तत्र किं प्रमाणमित्यत आह धर्ममेघमिमं प्राहुः समाधिं योगवित्तमाः इमं निर्विकल्पकसमाधिं धर्ममेघं प्राहुर्योगवित्तमाः श्रुतिश्चा
येन येन [illegible] धर्मसाक्षात्कारवतः इत्यर्थः स्पष्टं तद्रूपयोऽयति वर्षत्येष यतो धर्मामृतधाराः सहस्रशः ६० यतः कारणादेव निर्विक
ल्पकसमाधिर्धर्मामृतधारा धर्मलक्षणामृतधाराः सहस्रशो वर्षति तत एव मेघं [illegible] इति श्रुतेः अतो धर्ममेघं प्राहुरिति पूर्वेणान्व
यः ६० इदानीं समाधेः परमप्रयोजनमाह अमुना वासनाजाले निःशेषं प्रविलापिते समूलोन्मूलिते पुण्यपापाख्ये कर्मसंचये ६१
अमुना समाधिना वासनाजाले देहं कारममकारादिकर्तृत्वाद्यभिमानहेतुभूते ज्ञानविरुद्धे संस्कारसमूहे निःशेषं यथा भवति तथा प्रवि
लापिते विनाशिते पुण्यपापाख्ये कर्मसंचये समूलमुन्मूलिते मूलसहितं यथा भवति तथोन्मूलिते उद्धृते विनाशिते इति यावत् ६१ फ
लितमाह वाक्यमप्रतिबद्धं सत्प्राक्परोक्षावभासिते करामलकवद्बोधमपरोक्षं प्रसूयते ६२ वाक्यं तत्त्वमस्यादिवाक्यमप्रतिबद्धं स
त्कर्मवासनाभ्यां प्रतिबंधरहितं सत्प्राक्परोक्षावभासिते पूर्वं परोक्षतया प्रकाशिते तत्त्वे करा[illegible] अपरोक्षं परोक्षं तज्जयान्तर्गतं

15

११

ध्याने ध्यातारं ध्यानं च क्रमात्यक्त्वा ध्येयैकगोचरं ध्येयमेव केवलं गोचरो विषयो यस्य तत्तथाविधं भवति तदा समाधिरित्युच्यते तदुक्तं
स्थं ततः निवातदीपवदिति वायुरहिते देशे वर्तमानो दीपो यथा निश्चलो भवति तद्वदित्यर्थः ५५ ननु समाधेर्ध्यानान्नामनुपलब्धौ
ध्येयैकगोचरत्वमपि निश्चेतुं न शक्यत इत्याशंक्य वृत्तिसद्भावस्यानुमानगम्यत्वान्नैवमित्याह वृत्तयस्तु तदानीमज्ञाता अप्यात्मगोचराः
स्मरणादनुमीयन्ते व्युत्थितस्य समुत्थितात् ५६ आत्मगोचरा आत्मैकगोचरा एव विषया यासां ता वृत्तयस्तु तदानीं समाधिकालेऽज्ञाता
अपि व्युत्थितस्य समाधेरुत्थितस्य समुत्थितात्तत्त्वज्ञात्मस्मरणादेतावन्तं कालं समाहितोऽभूवमित्येवंरूपादनुमीयन्ते यद्यत्स्मर्यते तत्तदनुभू
तमिति व्याप्तेर्लौकिकसिद्धत्वादित्यर्थः ५६ ननु तदानीं वृत्त्युत्पादकप्रयत्नाभावात्कथं वृत्त्यनुवृत्तिरित्याशंक्य तात्कालिकप्रयत्नाभावेऽपि प्रा
थमिकादेव प्रयत्नाददृष्टादिसहकारिसहकृताद्भवतीत्याह वृत्तीनामनुवृत्तिस्तु प्रयत्नात्प्राथमादपि अदृष्टासकृदभ्याससंस्कारसचिवा
द्भवेत् ५७ ध्येयैकगोचराणां वृत्तीनामनुवृत्तिस्तु प्रवाहरूपेणानुवृत्तिस्तु प्राथमादपि प्रयत्नात्समाधिपूर्वकालीनादपि अदृष्टमसुकृ
सत्कर्माख्यः पुण्यविशेषः कर्मसु नैकस्य योगिनं हि विधमिति वेदामिति पातञ्जलिनामुक्तत्वात् यच्चासकृदभ्याससंस्कारः पुनःपुनः समा
धभ्यासेन जनितो भावनाख्यः संस्कारविशेषः ताभ्यां सहकारिकारणाभ्यां सह वर्तमानाद्भवति ५७ नन्वयं समाधिः पूर्वाचार्यैर्निरूपितः
तो दृष्ट इत्याशंक्य स्वगुरूणां श्रीपुरुषोत्तमेन निरूपितत्वाच्चैवमित्याह यथा दीपो निवातस्थ इत्यादिभिरनेकधा भगवान्निममेव प्राह मर्जुना
यन्नरूपयत् ५८ यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृतेत्यादिभिः श्लोकैरनेकैरनेकधा नानाप्रकारेण भगवानज्ञानेऽस्या दिसंपन्न

कल्पकत्वं नाम सविकल्पस्य निर्विकल्पस्य चेति पूर्वोक्ते न विशदीकृतत्वं लक्ष्यान्तं लक्षणवृत्त्या ज्ञातव्यं संबंधः संयोगादिः आदिशब्देन द्र
व्यद्वयोः समवेते तु गुणादेर्वा धारणे च तत्र द्रव्यत्वं नाम गुणाश्रयो द्रव्यं समवायिकारणं द्रव्यमिति वा तार्किकैर्लक्षितं कर्मव्यतिरिक्तत्वे स
ति जातिमात्राश्रयो गुणः नित्यमेकमनेकवृत्तिसामान्यमिति लक्षिता जातिः संयोगविभागयोरसमवायिकारणं जातीयं कर्मेति लक्षि
तं क्रिया एते सर्वे कल्पिता एवेत्यर्थः ५५ एतावता ग्रन्थसंदर्भेण किमुक्तं भवतीत्याकांक्षायां फलितमाह इत्थं वाक्येन तत्पदार्थानुसंधा
नं श्रवणं भवेत् युक्त्या संभावितत्वानुसंधानं मननं तु तत् ५६ इत्थं जगतो यदुपादानमित्यादिग्रन्थजातोक्तप्रकारेण वाक्येन तत्त्वमस्यादि
वाक्ये तत्त्वंपदार्थानुसंधानं तेषां वाक्यार्थो नाम तयोर्जीवब्रह्मणोरेकत्वं लक्षणया अनुसंधानं श्रवणं भवेत् युक्त्या शास्त्रस्यार्थो वेद्यान्त्यादि
नां परापरात्मनोरैक्यं युक्त्या संभावितेऽक्षतेत्येतेन ग्रन्थसंदर्भेणोक्तप्रकारतया संभावितत्वानुसंधानं युक्तस्यार्थस्योपपद्यमानत्वज्ञानं यद
लितं तु मननमित्युच्यते ५६ इदानीं निदिध्यासनमाह ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत् एकतानत्वमेतद्धि निदिध्यासनमुच्य
ते ५७ ताभ्यां श्रवणमननाभ्यां निर्विचिकित्सेऽर्थे निर्गता विचिकित्सा संशयो यस्मात्सो निर्विचिकित्सस्तस्मिन्नर्थे विषये स्थापितस्य
धारणावृत्तिस्थितस्य देशबंधश्चित्तस्य धारणेति पातंजलिनोक्तत्वात् यदेकतानत्वमेकाकारवृत्तिप्रवाहत्वमेतन्निदिध्यासनमुच्यते हि प्रसिद्धं
योगशास्त्रे तत्र प्रत्ययैकतानता ध्यानमिति ५७ तस्यैव निदिध्यासनस्य परिपाकदशारूपं समाधिमाह ध्यातृध्याने परित्यज्य क्रमाद्ध्येयै
कगोचरं निर्वातदीपवच्चित्तं समाधिरभिधीयते ५५ निदिध्यासने ध्यातृध्यानं ध्येयं चेति त्रितयं भासते तत्र यदा चित्तमभ्यासवशेन ध्या

पं. प्र. टी. १०

वामवेत् आद्येव्याहतिरन्यत्रानवस्थात्माश्रयादयः ५० सविकल्पस्यवा निर्विकल्पस्यवा लक्षणत्वमिति यो विकल्पस्तत्राह ततः सविकल्पो निर्वि
कल्पश्चेत्तत्र सविकल्पस्य भवेत् आद्ये प्रथमे पक्षे व्याहतिस्तत्र योक्ता व्याहतिरेव अन्यत्र द्वितीये नवस्थादयः तथाहि सविकल्पस्य विकल्प
स्तत्र विकल्पेन सह वर्तत इत्यत्र व्याहतिर्यो तावि कल्पपदेन प्रथमान्तविकल्पपदेन चैक एव विकल्पोभिधीयते द्वौ वा एक एव चेत्तत्रयमेक एव
विकल्पाश्रयविशेषणं तथाश्रयत्वं तदाश्रितो विकल्पस्तेन त्यात्माश्रयता द्वौ चेत्तदा तृतीयान्तशब्दनिर्दिष्टस्य सविकल्पस्य विकल्परूपता
तदाश्रयस्य सविकल्पकत्वात्तद्विशेषणभूतो विकल्पः किं प्रथमान्तशब्दनिर्दिष्ट एव विकल्पः उत ताभ्यामन्यः आद्ये ऽन्योन्याश्रयता द्वि
तीये धर्मिविशेषणीभूतो विकल्पः किं प्रथमान्तशब्दनिर्दिष्ट उतातो ऽन्यः आद्ये चक्रकापत्तिर्द्वितीये तस्याप्यन्यत एवास्याप्यन्य इत्यनवस्था
पात इति ५० न केवलं नैवेदं दूषणमपि तु सर्वेषां विविधविकल्पसंपृक्तं दूषणं प्रसक्तमित्याह इदं गुणक्रियाजातिद्रव्यसंबंधवस्तुषु समं इदं
विकल्पदूषणजातं गुणक्रियाजातिद्रव्यसंबंधवस्तुषु गुणादिसंबंधांतेषु पंचसु वस्तुषु समं तथाहि गुणाः किं निर्गुणे वर्तते उत गुणवति क्रि
याणि क्रियारहिते वर्तते क्रियावति वा आद्ये व्याहतिः अन्यत्रात्माश्रयादयः इति सर्वत्र चैवमूह्यं नन्विदमसदुत्तरं किं सदुत्तरमित्याह तेन स्वरू
पस्य सर्वमतद्दिति सत्यतां ५१ तेनैवं विकल्पस्यासंगतत्वेनैतद्गुणादिकं सर्वमसद्रूपमेतेषां गुणादयः सर्ववस्तुस्वरूपे वर्तत इत्यभिप्रायः
५१ भवत्वेवमन्यत्र प्रकृते किमायातमित्यत आह विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तुनि विकल्पतत्त्वलक्षणसंबंधाद्यालुकल्पिताः ५२
विकल्पतदभावाभ्यां विकल्पेन विकल्पाभावेन चासंस्पृष्टात्मवस्तुनि संस्पर्शरहिते परमात्मवस्तुनि विकल्पतत्त्वलक्षणसंबंधाद्यास्तत्र वि

18

पं. प्र. वि. ८

पदेनोच्यते ७५ एवं तत्त्वंपदार्थावभिधाय वाक्यार्थमाह त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीं अखण्डं सच्चिदानन्दं महावाक्येन लक्ष्यते
७६ त्रितयीमपि त्रिप्रकारां ... तमःप्रधानविशुद्धसत्त्वप्रधानमलिनसत्त्वप्रधानत्वभेदेनोक्तामत एव परस्परविरोधिनीं तां मायां मुक्त्वा
परित्यज्याखण्डं भेदरहितं सच्चिदानन्दं ब्रह्म महावाक्येन लक्ष्यते ७६ ननु केवललक्षणया कथं वाक्यार्थबोधनं कथं ... इत्याशङ्क्याह सोऽयं
मित्यादिवाक्यवद्विरोधान्नदिष्टं तयोः त्यागेन भागयोरेक आश्रयो लक्ष्यते यथा ७७ सोऽयं देवदत्त इत्यादिवाक्ये तत्तेदन्तयोस्तत्तद्देशका
लवैशिष्ट्यलक्षणयोर्धर्मयोर्विरोधादैक्यानुपपत्तेर्भागयोर्विरुद्धांशयोस्त्यागेनैकाश्रयो देवदत्तस्वरूपमेव यथा लक्ष्यते ७७ एवं दृष्टान्तम
भिधाय दार्ष्टान्तिकमाह मायाविद्ये विहायैवमुपाधी परजीवयोः अखण्डं सच्चिदानन्दं परं ब्रह्मैव लक्ष्यते ७८ एवं सोऽयं देवदत्त इत्यादिवाक्यव
त्तत्त्वमस्यादिवाक्ये परजीवयोरुपाधी उपाधिभूते मायाविद्ये पूर्वोक्ते विहायाखण्डं भेदरहितं सच्चिदानन्दं परं ब्रह्मैव महावाक्येन लक्ष्यते ७८ ननु
किं महावाक्येन लक्ष्यं सविकल्पकमुत निर्विकल्पकमिति विकल्प्य प्रथमे पक्षे दोषमाह पूर्ववादी सविकल्पस्य लक्ष्यत्वे लक्ष्यस्य स्याद्व
स्तुता सविकल्पस्य विकल्पेन विपरीतत्वेन कल्पितेन नामजात्यादिना ... एव वर्तत इति सविकल्पं न स्याल्लक्ष्यं वाक्येन बोध्यत्वेन लक्ष्यस्य
वाक्यार्थतयाभिमतस्यावस्तुनः ... मिथ्यात्वं भवेत् द्वितीये दोषमाह निर्विकल्पस्य लक्ष्यत्वं न दृष्टं न च संभवेत् निर्विकल्पस्य नामजात्यादि
रहितस्य लक्ष्यत्वं लोके क्वापि न दृष्टं न संभवति विकल्पभिन्नस्य निर्विकल्पस्याश्रयत्वासंभवात् उपपद्यमानमपि न भवतीति लक्ष्यत्वं धर्मयतो
निर्विकल्पकत्वव्याघातादिति यावत् ८० सिद्धान्ती जातु न मन्त्रवाद्येदं चोद्यमिति विकल्पयन्नेव दोषमाह विकल्पो निर्विकल्पस्य सविकल्पस्य वा

(७)

श्री

७९

८

षादिषीकागर्भस्यं कोमलत्वं लक्षणे युक्त्यावहितावरकत्वेनाप्यितानां मूलदलपत्राणां विभाजनलक्षणेनोपायेन समुद्धियते एवमात्मापि पु
ञ्जान्वयव्यतिरेकलक्षणेनोपायेन शरीरत्रितयात्पूर्वोक्ताच्छरीरत्रयाद्धीरैर्ब्रह्मचर्यादिसाधनसंपन्नैरधिकारिभिः समुद्धृतः एवमुक्तं तस्य
त्वंपदं ब्रह्मैव जायते चिदानंदरूप[illegible]स्यलक्षणेनोभयोरविशिष्टत्वादित्यभिप्रायः एतावता ग्रंथसंदर्भेण तत्पदलक्ष्यतत्त्वज्ञानस्य निरूपि
तत्वात् तदनंतरं ग्रंथभागस्यानारंभप्रसंग इत्याशंक्य [illegible]रारंभमिहि हृये तत्त्वाद्युक्तीनेन पूर्वोक्तस्य ग्रंथस्य तात्पर्यमाह परापरात्मनोरेवं युक्त्यासं
भावितैकता तत्त्वमस्यादिवाक्यैः सा भागत्यागेन लक्ष्यते ७२ एवमुक्तप्रकारेण परापरात्मनोस्तत्त्वंपदार्थयोः परमात्मजीवात्मनोरे
कताऽभिन्नता युक्त्या लक्षणसामर्थ्यरूपया श्रीगुरूपायेन संभाविता अंगीकारिता सा एकरूपता तत्त्वमस्यादिवाक्यैः स्पष्टं भागत्यागेन विरुद्धांशप
रित्यागेन लक्ष्यते लक्षणावृत्त्या बोध्यते ७३ तत्त्वमसीति वाक्यार्थे [illegible]स्य तत्पदादिपदार्थज्ञानपूर्वकत्वात्तत्पदस्य वाच्यार्थं तावदाह जगतो
यदुपादानं मायामादाय तामसीं निमित्तं शुद्धसत्त्वां तदुच्यते ब्रह्म तद्गिरा ७४ यत्सच्चिदानंदलक्षणं ब्रह्म तामसीं तमोगुणप्रधानां मा
यामादाय उपाधित्वेन स्वीकृत्य जगतश्चराचरात्मकस्य कार्यवर्गस्योपादानमध्यासाधिष्ठानं शुद्धसत्त्वां विशुद्धसत्त्वप्रधानां तामुपाधित्वेनाऽ
स्वीकृत्य निमित्तमुपादानाद्यभिन्नं कर्तृ भवति तद्ब्रह्म निमित्तोपादानोभयरूपं ब्रह्म तद्गिरा तत्त्वमसीति वाक्यस्थेन तत्पदेनोच्यते ७४ त्वंप
दवाच्यार्थमाह यदा मलिनसत्त्वां तां कामकर्मादिदूषितां आदत्ते तत्परं ब्रह्म त्वंपदेन तदोच्यते ७५ तदेव तत्परं यदा यस्मिन्काले मलि
नसत्त्वप्रधानां [illegible]पडुपलक्षितमलिनसत्त्वप्रधानामत एव कामकर्मादिदूषितामविद्यासंज्ञां मायामादत्ते उपाधित्वेन स्वीकरोति तदा तं

पं॰ प्र॰ टी॰ ८

तेन स्फुरणमात्मनोन्वयः स्यात् ३९ तद्भाने तस्यात्मनो भाने लिंगस्याभानं लिंगदेहस्य व्यतिरेक उच्यते तेषु पंचकोशविवेचनमुपक्र
म्य लिंगदेहविवेचनं प्रकृतं तल्लिंगगतमित्याशंक्य प्राणमयादिकोशत्रितयस्य तत्रैवांतर्भावान्न पृथक्त्वासंगतिरित्याह तद्विवेकाद्विविक्ताः
स्युः कोशाः प्राणमनोधियः ४० तस्य लिंगशरीरस्य विवेकाद्विवेचनात् प्राणमनोधियः एतन्नामकाः कोशा विविक्ता आत्मनः पृथक्कृ
ताः स्युः ४ कुत इत्यत आह ते हि तत्र गुणावस्थाभेदमात्रात्पृथक्कृताः तत्र तस्मिंल्लिंगशरीरे हि यस्मात्कारणात्ते प्राणमयादयो गुण
वस्थाभेदमात्राद्गुणयोः सत्त्वरजसोरवस्थाभेदमात्राद्गुणप्रधानभावेनावस्थाविशेषादेव पृथक्कृता भेदेन निर्दिष्टा इत्यर्थः इदानीमानंदमय
कोशस्य विवक्षितस्य कारणशरीरस्य विवेकोपायमाह सुषुप्त्यभाने भानं तु समाधावात्मनोन्वयः व्यतिरेकस्त्वात्मभाने सुषुप्त्यनवभास
नं समाधौ वक्ष्यमाणलक्षणायां समाध्यवस्थायां सुषुप्त्यभाने सुषुप्तिशब्दोपलक्षितस्य कारणदेहस्याज्ञानस्याप्रतीतौ आत्मनस्तु शब्दो
वधारणे आत्मन एव भाने स्फुरणं यदस्ति स आत्मनोन्वयः ४१ आत्मभाने आत्मनः स्फुरणे सत्यां सुषुप्त्यनवभासनं सुषुप्त्युपलक्षितस्याज्ञा
नस्याप्रतीतिरेव व्यतिरेक इत्यर्थः अत्रायं प्रयोगः प्रत्यगात्मान्नमयादिभ्यो भिद्यते तेषु परस्परं व्यावर्तमानेष्वपि स्वयमव्यावृत्तत्वात् यद्ये
षु व्यावर्तमानेष्वपि न व्यावर्तते स तेभ्यो भिद्यते यथा कुसुमेभ्यः सूत्रं यथा वा खंडादिव्यक्तिभ्यो गोत्वमिति अन्वयव्यतिरेकाभ्यां कोशपंचकाद्वि
विक्तस्यात्मनो ब्रह्मप्राप्तिर्भवतीत्युक्तमेतत्प्रतिपादिकामंगुष्ठमात्रः पुरुषोंतरात्मेत्यादिकां तं विद्याच्छुक्रममृतमित्यंतां कठश्रुतिमपीतः
पठति यथा मुंजादिषीकैवमात्मा युक्त्या समुद्धृतः ४२ शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायते यथा येन प्रकारेण मुंजात् तन्नामकात्तृणविशेषा

४१

२१

८

व सात्मनस्तु तेन तेन कोशेन सह तादात्म्याभिमानादित्याह तत्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत् आत्मा प्रत्यगात्मा तत्तत्को
शैस्तेन तेन कोशैः सह तादात्म्यात्तादात्म्याभिमानात्तत्तन्मयस्तत्तत्कोशमयः स्याद्व्यवहारकालेऽन्नमयादिकोशप्राधान्यादन्नमयादिरू
पो वाच्यः अयमर्थः तुशब्द आत्मनः कोशेभ्यो विलक्षणत्वद्योतनार्थः कथं तर्हि एवंविधस्यात्मनो ब्रह्मत्वं भवतीत्याशंक्य कोशेभ्यो विवेकाद्भव
तीत्याह अन्वयव्यतिरेकाभ्यां पंचकोशविवेकतः आत्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते अन्वयव्यतिरेकाभ्यां वक्ष्यमाणलक्षणाभ्यां
पंचकोशविवेकतः पंचानां कोशानामन्नमयादीनां विवेकतः प्रत्यगात्मनो विवेचनेन पृथक्करणेन यद्वा पंचकोशेभ्योऽन्नमयादिभ्यः
आत्मनः पृथक्करणेनात्मानं प्रत्यगात्मानं ततस्तेभ्यः कोशेभ्य उद्धृत्य बुद्ध्या निष्कृष्य चिद्रूपेण स्वस्वरूपं निश्चित्य परं ब्रह्म पूर्णानन्दलक्षणं
प्रपद्यते प्राप्नोति परब्रह्मैव भवतीत्यर्थः इदानीं विवक्षितावन्वयव्यतिरेकौ दर्शयति अभाने स्थूलदेहस्य स्वप्ने यद्भानमात्मनः सोऽन्वयो
व्यतिरेकस्तद्भानेऽन्यानवभासनं स्वप्ने स्वप्नावस्थायां स्थूलदेहस्यान्नमयकोशस्याभानेऽप्रतीतौ सत्यामात्मनः प्रतीचो यद्भानं स्वप्नसा
क्षित्वेन प्रत्यक्षरूपेण स्फुरणमस्ति स आत्मनोऽन्वयः तस्यामेव स्वप्नावस्थायां तद्भाने तस्यात्मनः स्फुरणे सति अन्यानवभासनमन्यस्य स्थूलदेहस्या
नवभासनमप्रतीतिः स व्यतिरेकः स्थूलदेहस्येति शेषः अस्मिन्प्रकरणेऽन्वयव्यतिरेकाभ्यामनुवृत्तिव्यावृत्ती उच्यते एवं स्थूलदेहस्यात्मना
विवेकबोधकावन्वयव्यतिरेकौ दर्शयित्वा लिंगदेहस्य तथात्वावगमकौ तौ दर्शयति लिंगाभाने सुषुप्तौ स्यादात्मनो भानमन्वयः २४ व्यति
रेकस्तु तद्भाने लिंगस्याभानमुच्यते सुषुप्तौ सुषुप्त्यवस्थायां लिंगाभाने लिंगस्य सूक्ष्मदेहस्याभानेऽप्रतीतावात्मनो भानं तदवस्थासाक्षि

पं॰ प्र॰ टी॰ ७

तैः कोशैस्तावदन्नमयादिभिः स्वात्मा स्वस्वरूपभूत आत्मा विस्मृत स्वस्वरूपविस्मारणेन संसृतिं जननमरणादिप्रवाहरूपं संसारं व्रजेत् प्राप्नुयात् २३ को-
शो यथा कोशकारकृमेरावरकत्वेन कोश आदेहे तु देवमन्नादयो पञ्चाप्यानंदस्वावरकत्वेनात्मनः कोश इत्युच्यते कोशा उपपञ्चः तेषां कोशा-
नां स्वरूपाणि क्रमेण व्युत्पादयति स्थूलं पंचीकृतेत्यादिना मोदादिवृत्तिभिरित्यंतेन सार्धश्लोकद्वयेन स्थूलं पंचीकृतभूतोत्थो देहः स्थू-
लोऽन्नमयसंज्ञकः २७ लिंगे तु राजसैः प्राणैः प्राणः कर्मेंद्रियैः सह सात्विकैर्धीन्द्रियैः साकं विमर्शात्मा मनोमयः २८ तैरेव साकं विज्ञानमयो
धीर्निश्चयात्मिका कारणे सत्वमानंदमयो मोदादिवृत्तिभिः २९ पंचीकृतेभ्यो भूतेभ्य उत्पन्नः स्थूलो देहोऽन्नमयसंज्ञोऽन्नमयशब्दाभिहितः कोशः
स्यात् २७ प्राणस्तु प्राणमयः कोशो लिंगे लिंगशरीरवर्तिभिः राजसै रजोगुणकार्यभूतैः प्राणैः प्राणापानादिभिर्वायुभिः पंचभिर्वा-
गादिभिः कर्मेंद्रियैः सह दशभिः स्यात् विमर्शात्मा संशयात्मकं पंचभूतसत्वकार्यं यन्मन उक्तं तत् सात्विकैः प्रत्येकभूतकार्यभूतैर्धीन्द्रियैः
श्रोत्रादिभिः पंचभिर्ज्ञानेंद्रियैः साकं सहितं मनोमयः कोशः स्यादिति सर्वत्र संबंधः २८ निश्चयात्मिका धीस्तैरेव सत्वकार्यरूपा बुद्धिस्ते-
रेव पूर्वोक्तैर्ज्ञानेंद्रियैः साकं सहिता सती विज्ञानमयाख्यः कोशः स्यात् कारणे कारणशरीरभूतायामविद्यायां यन्मलिनं सत्वमस्ति तत्
मोदादिवृत्तिभिः प्रियमोदप्रमोदाख्याभिरिष्टदर्शनलाभभोगजन्यैः सुखविशेषैः सहितमानंदमयः कोशः स्यात् २९ ननु स्थूलशरीरा-
दीनामन्नमयादिशब्दवाच्यत्वं स वा एष पुरुषोऽन्नरसमयः तस्मादेतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयः अन्योऽन्तर
आत्मा मनोमयः इत्यादिश्रुतत्वादात्मनोऽन्नमयादिशब्दवाच्यत्वं कथमुच्यते इत्याशंक्य देहादीनामन्नादिविकारत्वेनान्नमयादिशब्दवाच्य-

23

प्र

त्याशयेनोक्तमित्याह प्रत्यक्तत्त्वबोधविवर्जिताः १९ कुर्वंते कर्म भोगाय कर्म कर्तुं च भुंजते नद्यां कीटा इवावर्तादावर्तान्तरमाशु ते २० व्रजं
तो जन्मनो जन्म लभंते नैव निर्वृतिं अत एव भोगाय सुखाद्यनुभवसाधनाय मनुष्यादिशरीराण्यपि प्राप्य कर्म [illegible] चित्तानेकमी
णा कुर्वते जाताविकवचनं पुनः कर्म कर्तुं देवादिशरीरेषु तत्फलं भुंजते च फलानुभवाभावे तत्तज्जातीयेच्छानुपपत्त्या तत्साधना
नुष्ठानानुपपत्तेः एवं वर्तमानास्ते जीवा नदीप्रवाहे पतिताः कीटा आवर्तादावर्तान्तरमाशु व्रजंतो यथा निर्वृतिं न लभंते २० एवमाशु जन्म
नो जन्म व्रजंतः सुखं न लभंत इति एवं संसारावर्तमभिधाय तत्र विरक्तप्राप्त्यर्थं [illegible] तावदाह सत्कर्मपरिपाकात्ते कर्मणा निर्दोषेणो
द्धृताः प्राप्य तीरं तरुच्छायां विश्राम्यंति यथा सुखं तेकीटाः सत्कर्मपरिपाकात् पूर्वोपार्जितपुण्यकर्मपरिपाकात् [illegible] केनचित् पुरुषवि
शेषेण उद्धृताः नदीप्रवाहाद्बहिर्निस्सारिताः संतः २१ तीरं [illegible] सुखं यथा भवति तथा तद्वद्विश्राम्यंति इदानीं दृष्टान्ते सिद्धमर्थं
दार्ष्टान्तिके योजयति उपदेशमवाप्यैवमाचार्यात्तत्त्वदर्शिनः २२ पंचकोशविवेकेन लभंते निर्वृतिं परां एवमुक्तप्रकारेण पूर्वोपार्जितपुण्य
कर्मपरिपाकवशादेव तत्त्वदर्शिनः प्रत्यगभिन्नब्रह्मसाक्षात्कारवत आचार्यात् करोपसत्त्या उपदेशं [illegible] ज्ञानसाधनं
श्रवणं वक्ष्यमाणमवाप्य संपाद्य पंचकोशविवेकेनान्नमयादीनां पंचानां कोशानां विवेकेन वक्ष्यमाणविवेचनेन परां निर्वृतिं मोक्षम
लभंते प्राप्नुवंति के तेऽन्नादयः पंचकोशा इत्याकांक्षायां तानुद्दिशति अन्नं प्राणो मनो बुद्धिरानंदश्चेति पंच ते २३ कोशाः अन्नं प्राणो म
नो बुद्धिरानंदश्चेत्येते पंचकोशाः बुद्धिस्त्वानं २३ तेषामन्नादीनां कोशशब्दाभिधेयत्वे कारणमाह तैरावृतः स्वमात्मा विस्मृत्य संसृतिं व्रजेत्

२२

24

पं॰ वि॰ ६

ति २६ कथमेकैकस्य पंचपंचात्मकत्वमित्यत आह द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंच ते २७ विय
दादिकमेकैकं द्विधा द्विधातं चैकैकं [illegible] ततो द्विधाशब्दः विधाय कृत्वा भागद्वयोपेतं कृत्वेत्यर्थः पुनश्च पुनरपि प्रथमभागं चतुर्धा भागचतुष्टयो
पेतं विधायेत्यनुषज्यते स्वस्वेतरद्वितीयांशैः स्वस्मात्स्वस्मादितरेषां चतुर्णां चतुर्णां भूतानां यो योऽर्धो द्वितीयः स्थूलो भागस्तैस्तैः सह प्रथमभागां
गांशानां चतुर्णां चतुर्णां मेलने एकैकस्य योजनात्ते वियदादयः प्रत्येकं पंच पंचात्मका भवंति एवं पंचीकरणम[illegible]यते भूतैरुत्पाद्यमानं कार्य
वर्गं दर्शयति तैरंडस्तत्र भुवनभोग्यभोगाश्रयोद्भवः तैः पंचीकृतैर्भूतैरुपादानत्वेन कारणभूतैरंडो ब्रह्मांडमुत्पद्यते तत्र ब्रह्मांडांतर्भुवना
न्युपरिभागे वर्तमानानां भूरादयः सप्त लोकाः भूमेरधः स्थितान्यतलवितलादिसप्तपातालानि तेषु भुवनेषु तैस्तैः प्राणिभिर्भोक्तुं योग्यान्यन्न
दीनि तल्लोचितशरीराणि तैरेव पंचीकृतैर्भूतैः शरीराणि जायंते एवं स्थूलशरीरोत्पत्तिमभिधायैतेषु स्थूलशरीरेष्वभिमानवतो हिरण्यगर्भः
स्य समष्टिरूपस्य वैश्वानरसंज्ञकत्वं एकैकस्थूलशरीराभिमानवतां व्यष्टिरूपाणां तैजसानां विश्वसंज्ञकत्वं च भवतीत्याह हिरण्यगर्भः स्थूलेऽस्मि
न्देहे वैश्वानरो भवेत् २८ तैजसा विश्वतां याताः [illegible]स्मिन्स्थूले देहे च वर्तमानो हिरण्यगर्भो वैश्वानरो भवेत् २८ ते च वर्तमानास्तैजसा वि
श्वा भवंति तेषामवांतरभेदमाह देवतिर्यङ्नरादयः इत्यनेन तेषां विश्वसंज्ञाप्राप्तानां तत्त्वज्ञानरहितत्वेन संसारापत्तिप्रकारं [illegible]श्लोकद्वये
नाह ते पराग्दर्शिनः ते देवादयः पराग्दर्शिनो बाह्यानेव शब्दादीन्पश्यंति न तु प्रत्यगात्मानं पराचि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् प
श्यंति नांतरात्मन्निति श्रुतेः ननु तार्किकादयो देहव्यतिरिक्तमात्मानं जानंतीत्याशंक्याप्यात्मानं ते जानंति तथापि सम्य[illegible] तत्त्वेन जानंती

२७

६

25

२३

प्रासंख्याकैः सूक्ष्मशरीरं भवति तस्यैव संज्ञान्तरमाह तल्लिंगमुच्यते २३ उच्यते वेदान्तेष्वित्यर्थः एवं सूक्ष्मशरीरमभि[illegible]तदभिमानवशपु
क्तं प्राज्ञेश्वरयोरवस्थान्तरं दर्शयति प्राज्ञस्तत्राभिमानेन तैजसत्वं प्रपद्यते हिरण्यगर्भतामीशः प्राज्ञो मलिनसत्त्वप्रधानाविद्योपाधिको जी
वस्तत्र तैजसः शब्दवाच्यः ततः कर्तृत्वोपलक्षितलिंगशरीरेऽहमित्यभिमानेन तादात्म्याभिमानेन तैजसत्वं तैजसनामकत्वं प्रपद्यते ईशोऽपीति ईशो
विशुद्धसत्त्वप्रधानमायोपाधिकः परमेश्वरस्तत्सूक्ष्मशरीरेऽहमित्यभिमानेन हिरण्यगर्भतां हिरण्यगर्भसंज्ञत्वं प्रपद्यत इत्यनुषंगः तैजसहि
रण्यगर्भयोर्लिंगशरीराभिमानत्वे समाने सति तयोः परस्परं भेदः किं निबंधन इत्यत आह तयोर्व्यष्टिसमष्टिता २४ तयोस्तैजसहिरण्यगर्भ
योर्व्यष्टित्वं समष्टित्वं च भवति तत एव भेद इत्यर्थः २४ ईश्वरस्य समष्टिरूपत्वे जीवानां व्यष्टिरूपत्वे च कारणमाह समष्टिरीशः सर्वेषां स्वा
त्मतादात्म्यवेदनात् तदभावात्ततोऽन्ये तु कथ्यन्ते व्यष्टिसंज्ञया २५ ईशः ईशो हिरण्यगर्भः सर्वेषां लिंगशरीरोपाधिकानां तैजसानां स्वात्म
तादात्म्यवेदनात् स्वात्मना तादात्म्यस्य स्वात्मैक्यस्य वेदनात् ज्ञानात् समष्टिर्भवति ततः ईश्वरादन्ये जीवास्तु तदभावात् तस्य तादात्म्यवेदनस्याऽ
भावाद्व्यष्टिसंज्ञया व्यष्टिशब्देन कथ्यन्ते २५ एवं लिंगशरीरमभिधाय तदुपाधिकौ तैजसहिरण्यगर्भौ च दर्शयित्वा स्थूलशरीरोत्पत्तिसिद्धये
पंचीकरणं निरूपयितुमाह तद्भोगाय पुनर्भोग्यभोगायतनजन्मने पंचीकरोति भगवान्प्रत्येकं वियदादिकं २६ भगवानैश्वर्यादिगुणसं
[illegible]संपन्नः परमेश्वरः पुनरपि तैः सृज्यन्ते येषां जीवानां भोगायैव भोग्यभोगायतनजन्मने भोग्यस्यान्नादेर्भोगायतनस्य जरायुजादेश्चतुर्विधश
रीरजातस्य च जन्मने उत्पत्तये वियदादिकमाकाशादिभूतपंचकं प्रत्येकमेकैकं पंचीकरोति पंचकात्मकं प्रत्येकं पंचात्मकं संपादयमानं करो

सत्त्वगुणभागैरुपादानभूतैः श्रोत्रत्वगक्षिरसनघ्राणाख्यं धीन्द्रियपंचकं धीन्द्रियाणि ज्ञानेन्द्रियाणि तेषां पंचकं क्रमादुत्पद्यते एकैकभूतस
त्त्वांशादेकैकमिन्द्रियं जायत इत्यर्थः १९ समष्ट्यंशानां प्रत्येकमसाधारणकार्याण्यभिधाय सर्वेषां साधारणकार्यमाह तैरंतःकरणं सर्वैः
तैः सहसत्त्वांशैः सर्वैः संभूय वर्त्तमानैरंतःकरणं मनोबुद्ध्युपादानभूतं द्रव्यमुत्पद्यत अस्यानुक्रमः तस्यांतरभेदं सनिमित्तमाह वृत्तिभेदेन
तद्द्विधा तदेतैरंतःकरणं वृत्तिभेदेन परिणामभेदेन द्विप्रकारं भवति वृत्तिभेदमेव दर्शयति मनो विमर्शरूपं [illegible]बुद्धिः स्यान्निश्चयात्मिका १०
विमर्शरूपं विमर्शः संशयात्मिका वृत्तिः सा स्वरूपं यस्य तत्तथा तन्मनः स्यात् निश्चयात्मिका निश्चयो ध्यवसायः स आत्मा स्वरूपं यस्याः सा
निश्चयात्मिका वृत्तिर्बुद्धिः स्यात् क्रमप्राप्तानां रजोंशानां प्रत्येकमसाधारणकार्यमाह रजोंशैः पंचभिस्तेषां क्रमात्कर्मेन्द्रियाणि तु वाक्पाणि
पादपायूपस्थाभिधानानि जज्ञिरे २१ तेषां वियदादीनामेव पंचभिः रजोंशैः रजोभागैरुपादानभूतैर्वाक्पाणिपादपायूपस्थाभिधानान्येत
क्रियात्मकानि च कर्मेन्द्रियाणि क्रियाजनकानीन्द्रियाणि जज्ञिरे २१ रजोंशानामेव साधारणं कार्यमाह तैः सर्वैः सहितैः प्राणः सहितैः संभूयका
रणतां गतैः प्राणो जायत इति शेषः तस्यांतरभेदमाह वृत्तिभेदात्स पंचधा सप्राणो वृत्तिभेदात्प्राणादिव्यापारभेदात्पंचप्रकारो भवति
वृत्तिभेदानेव दर्शयति प्राणोऽपानः समानश्चोदानव्यानौ च ते पुनः २२ पुनस्तु ते भेदाः प्राणादिरूपा वायव इत्यर्थः २२ [illegible]शादिप्रा
णां तानां सृष्टिरुक्ता तदिदानीं दर्शयति बुद्धिकर्मेन्द्रियप्राणपंचकैर्मनसा धिया शरीरं सप्तदशभिः सूक्ष्मं बुद्धयो ज्ञानानि [illegible] व्यापारास्त
ज्ञानकानीन्द्रियाणि प्राणाश्च बुद्धिकर्मेन्द्रियप्राणास्तेषां पंचकैस्तैर्मनसा विमर्शात्मकेन धिया निश्चयरूपया बुद्ध्या च एवं सप्तदशभिः सप्तद

प.
वे.

रजः प्रत्ययः स्वप्नसुषुप्त्योर्लक्षणानि यांस्वप्नावस्थायामपि विषयाणामभिन्नानमंविदिति ननु यदि स्वप्नजागरयोर्वैलक्षण्यं तदा विषयतत्त्वं विरोधभे
दाभेदाभ्यां तर्हि स्वप्नो जागर इति भेदव्यवहारः किं निमित्तक इत्याशंक्याह अत्रैवेदं तु न स्थिरं तत्र हेतोत इति अत्र स्वप्ने बुध्यं परिदृश्यमानं वस्तु
जातं न स्थिरं तस्यापि प्रतीतिमात्रशरीरत्वात् जागरे तु परिदृश्यमानं वस्तुजातं स्थिरं स्यात् त्रिकालान्तरेऽपि दृश्ययोग्यत्वात् अतः स्थिरास्थिर
विषयत्वलक्षणवैलक्षण्यात्तत्त्वयोः स्वप्नजागरयोर्भेदव्यपदेशः ननु स्वप्नजागरयोर्भेदस्थैर्यं तत्त्वं विरोध[illegible]रः स्यादित्याशंक्याह तयोः
संविदेकरूपा न भिद्यत इति एकरूपेति हेतुगर्भितविशेषणं ४ एवमर्थस्याहृदये ज्ञानस्यैकत्वं प्रसाध्य सुषुप्तिकालीनस्यापि तस्यैकत्वप्रसा
धनाय तत्र तावज्ज्ञानं साधयति सुप्तोत्थितस्य सौषुप्ततमोबोधो भवेत्स्मृतिरिति सुप्तः उत्थितः सुप्तोत्थितः सुप्तं सुषुप्तिस्तस्मादुत्थित इति वा त
स्य सौषुप्ततमोबोधः सुषुप्तिकालीनस्य तमसोऽज्ञानस्य योऽबोधोऽज्ञानमासीन्न किंचिदवेदिषमिति स स्मृतिरेव भवेन्नानुभवः तत्कारणमाह
यस्त्रिक[illegible]व्याप्तिलिंगादेरभावादिति भावः ततः किं तत्राह सा चावबुद्धविषयेति सा च स्मृतिरवबुद्धविषया अवबुद्धोऽनुभूतो विषयो यस्याः
सा तथोक्ता यादृश्याः स्मृतेः सानुभवपूर्विकेति व्याप्तेर्लोके दृष्टेति भावः ततोऽपि किं तत्राह अवबुद्धं तमस्तदा तत इति ५ तत तस्मात्कारणात् सौषु
प्तं तमस्तदा सुषुप्त्यवस्थायामवबुद्धमनुभूतमित्यवगंतव्यं तत्रायं प्रयोगः विमतं न किंचिदवेदिषमिति ज्ञानमनुभूतपूर्वकं भवितुमर्हति स्मृतित्वात्
सम्प्रतिपन्नस्मृतिवदिति ५ तस्यानुभवस्य[illegible]विषयादज्ञानाद्भेदं बोधांतराभेदं चाह स चापि बोधो विषयाद्भिन्नो न बोधात्स्वप्नबोधवदिति सबो
धः सौषुप्ताज्ञानानुभवो विषयादज्ञानाद्भिन्नः पृथग्भवितुमर्हति बोधत्वात् स्वप्नबोधवत् बोधांतरात्तु भिद्यते बोधत्वात् स्वप्नबोधवत् फलितं

30 २

म्हृतविप्रणाशात्स्वबाधकसद्भावान्नैवमिति परिहरति पूर्वजन्मन्यसत्त्वेतज्जन्मसंपादयेत्कथं भाविजन्मन्यसत्कर्म भुंजीतेह संचितं
४ एतद्देहरूपस्यात्मनः पूर्वस्मिञ्जन्मन्यसत्त्वादेतज्जन्महेत्वदृष्टासंभवेऽप्यस्य जन्मनोऽङ्गीक्रियमाणत्वादकृताभ्यागमः प्रसज्येत तथा
भाविजन्मन्यप्यस्य स्वदेहरूपस्यात्मनोऽसत्त्वादभावादनुष्ठितयोः पुण्यपापयोर्देहात्मनो भोक्तृत्वाभावेन भोगमन्तरेणापि कर्मविनाशः प्रसज्येत
अयं कृतविप्रणाशः एवं कृतविप्रनाशाकृताभ्यागमरूपबाधकसद्भावादात्मनः कायित्वं नाङ्गीकर्तव्यमित्यर्थः ४ एवमन्नमयकोशस्या
नात्मत्वं प्रदर्श्य प्राणमयकोशस्य स्वरूपं तदनात्मत्वं च दर्शयति पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्तकः वायुः प्राणमयो नासावात्मा यो
वायुर्देहे पूर्णः पादादिमस्तकपर्यन्तं व्याप्तः सन् बलं यच्छन् प्राणापानादिरूपेण सामर्थ्यं प्रयच्छन्नक्षाणां चक्षुरादीनामिन्द्रियाणां प्रवर्तकः प्र
वर्तते स वायुः प्राणमय इत्युच्यते स आत्मा न भवति तत्र हेतुमाह चैतन्यवर्जनात् ५ विवादाध्यासितः प्राण आत्मा न भवति जडत्वाद्घट
वदिति भावः ५ इदानीं मनोमयस्य स्वरूपप्रदर्शनपूर्वकं तस्याप्यनात्मत्वमाह अहंतां ममतां देहे गेहादौ च करोति यः कामाद्यवस्थया
भ्रान्तो नासावात्मा मनोमयः ६ देहेऽहंतामहंभावं गृहादौ ममतां ममत्वाभिमानं च यः करोति सो मनोमय आत्मा न भवति कुतः इत्यत आ
ह कामाद्यवस्थया भ्रान्त इति हेतुगर्भितं विशेषणं कामक्रोधादिरूपेणानेकानि यतस्तद्भावत्वादित्यर्थः तथा च मनोमय आत्मा न भवति विका
रवत्वाद्देहवदिति भावः ६ अनन्तरं कर्तृशब्दवाच्यस्य विज्ञानमयस्य स्वरूपं प्रदर्श्य तस्यानात्मत्वं च दर्शयति लीना सुप्तौ वपुर्बोधे व्याप्नुयादा
नखाग्रगा चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक् ७ या चिच्छायोपेता धीश्चिदाभाससहिता बुद्धिः सुप्तौ सुषुप्तिकाले लीना विलीना देहे

31

पं॰ को॰ २

बोधे जागरणकाले आनखाग्रमानखाद्व्याप्य वर्तमाना सती वपुः शरीरं व्याप्नुयात् संव्याप्य वर्तते सा विज्ञानमयशब्दभाग्विज्ञानमयशब्दे
नोच्यमाना ऽसावव्याप्तात्मा न भवति विलयावस्थावत्वाद् घटादिवदित्यर्थः ७ ननु मनोबुद्ध्योरंतःकरणविशेषान्मनोमयविज्ञानमय
रूपेण कोशद्वयकल्पनानुपपन्नेत्याशंक्य कर्तृत्वकरणत्वाभ्यां भेदसद्भावादुक्तत एव मनोमयत्वादिभेद इत्याह कर्तृत्वकरणत्वाभ्यां वि
क्रियेतांतरिंद्रियं विज्ञानमनसी अंतर्बहिष्ट्वे ते परस्परं ८ अंतरिंद्रियमंतःकरणं कर्तृत्वकरणत्वाभ्यां कर्तृरूपेण करणरूपेण च वि
क्रियते परिणमत इत्यर्थः एते कर्तृकरणे विज्ञानमनसी विज्ञानमनःशब्दवाच्ये भवतः एते च परस्परमंतर्बहिर्भावेन वर्तेते ततस्तत्को
शद्वयमुपपद्यत इत्यर्थः ८ इदानीं भोक्तृशब्दवाच्यस्यानंदमयस्यानात्मत्वं दर्शयितुं तस्य स्वरूपमाह काचिदंतर्मुखा वृत्तिरानंदप्रति
बिंबभाक् पुण्यभोगे भोगशांतौ निद्रारूपेण लीयते ९ पुण्यभोगे पुण्यकर्मफलानुभवकाले काचिद्वृत्तिरंतर्मुखा सती आनंदप्र
तिबिंबभाग् आत्मस्वरूपस्यानंदस्य प्रतिबिंबं भजते सैव भोगशांतौ पुण्यकर्मफलभोगोपरमे सति निद्रारूपेण लीयते विलीना भवति सा
वृत्तिरानंदमय इत्यभिप्रायः ९ तस्यानात्मत्वमाह कादाचित्कत्वतो नात्मा स्यादानंदमयोप्ययं अयमानंदमयोपि कादाचित्कत्वादात्मा न
स्याद् घटादिपदार्थवदित्यर्थः ननु विद्यमानानामानंदमयादीनां सर्वेषामनात्मत्वे निराधारत्वं प्रसज्येतेत्याशंक्याह बिंबभूतो य आनंद
आत्मासौ बुद्ध्यादौ प्रतिबिंबतया वर्तितस्य प्रियादिशब्दवाच्यस्यानंदमयस्य बिंबभूतः कारणभूतो य आनंदः स एवात्मा भवति कुत इत्यत
आह सर्वदा स्थितेः १० नित्यत्वादित्यर्थः विकारादर्शित आनंद आत्मा भवितुमर्हति नित्यत्वात् य आत्मा न भवति नासौ नित्यो यथा देहः

द्विः गगनादेस्तु यत्तिमत्त्वेनानित्यत्वान्मानैकांतिकत्वेति भावः १० सोऽहमिति ननु देहमुपक्रम्यानिद्रानंदांतवस्तुषु सोऽनुभूयमानत्वेमन्यत्तु
नकश्चिदनुभूयते ११ अत्र मयाद्यानंदमयांतानां कोशानामुक्तैर्हेतुभिरात्मत्वं न घटते चेन्माघटिष्ट अन्यस्त्वात्मानुपलभ्यमानत्वान्नैव
संभवति ११ परिहरति बाढं निद्रादयः सर्वैरनुभूयंते न चैतत् अत्र निद्राशब्देन निद्रानंदो लक्ष्यते निद्रादयो दृष्टांता उपलभ्यंतेऽन्यो नानुभू
यतऽइति यदुक्तं तत्सत्यं कथं तर्हि दृष्टांतितं स्वस्यात्मनोंगीकारऽइत्यत आह नयद्येतेऽनुभूयंते येन तं को निवारयेत् १२ अन्यस्यानुपलभ्य
मानत्वेपि यद्बलादेतेषां आनंदमयादीनामुपलभ्यमानता भवति सोऽनुभवः कथं नांगीक्रियतऽइत्यर्थः १२ ननु तेभ्योऽन्य आत्मा यदि विद्यते
तर्ह्युपलभ्येत न चोपलभ्यतेऽतो नास्तीत्याशंक्याह स्वयमेवानुभूतित्वाद्विद्यते नानुभाव्यते आनंदमयादीनां साक्षित्वेनानुभवस्वरूपत्वेना
नुभाव्यत्वेनास्तीति अनुभवरूपत्वेनानुभाव्यत्वं कुतो न स्यादित्याशंक्याह ज्ञातृज्ञानांतराभावादज्ञेयः ज्ञाता च ज्ञानं च ज्ञातृज्ञाने ऽन्ये ज्ञातृ
ज्ञाने ज्ञातृज्ञानांतरे तयोरभावस्तस्मादज्ञेयो ज्ञानविषयो न भवति ज्ञात्राद्यभावाद्धि न ज्ञायते तस्य वा समाहाहा किमत्र विचित्रमनेकारणमि
त्यत आह न वस्तुतया १३ निद्रानंदादिसाक्षित्वेनासत्त्वस्यापूर्वेऽपि यो निराकृतत्वादिति भावः १३ अनुभवरूपस्यात्मनोऽनुभाव्यत्वाभावे दृ
ष्टांतमाह माधुर्यादिस्वभावानामन्यत्र स्वगुणार्पिणां स्वस्मिंस्तदर्पणापेक्षा नो न चास्त्यस्त्यदर्पि १४ आदिशब्देनाम्लादयो गृह्यंते माधुर्या
दयः स्वभावाः सहजा धर्मविशेषा येषां ते माधुर्यादिस्वभावा गुडादयस्तेषामन्यत्र स्वसंस्पृष्टपदार्थेषु स्वगुणार्पिणां स्वगुणान्माधुर्यादीनर्पय
तीति स्वगुणार्पिणस्तेषां स्वस्मिन्स्वस्वरूपे गुडादिलक्षणे तदर्पणापेक्षा तेषां माधुर्यादीनामर्पणे संपादने ऽपेक्षाऽकांक्षा माधुर्यादिकं के न दि

त्पदार्थेन संपादनीयमित्येवं रूपा नो नैव विद्यते किंचान्यदपि कं नास्ति गुडादीनां माधुर्यप्रदं वस्त्वंतरं नास्तीत्यर्थः १४ सदृष्टांतं फलित
माह रूपकांतरराहित्येप्यसौ हि घंतात्स्वभावता माभूत्तस्यानुभाव्यत्वं बोधात्मा तु न हीयते १५ माधुर्यादिकं समर्पकवस्त्वंतराभावेप्येषां
गुडादीनां माधुर्यादिस्वभावता यथा विद्यते एवमात्मन्यप्यनुभाव्यविषयत्वं माभूदनुभवरूपता भवत्येवेत्यर्थः १५ उक्तार्थे प्रमाणमा
ह स्वयंज्योतिर्भवत्येष पुरोस्माद्भासतेखिलं तमेव भांतमन्वेति तद्भासा भासते जगत् १६ अत्रायं पुरुषः स्वयंज्योतिर्भवति अस्मात्म
वेद्यात्पुरतः सहि भासते सभासा सर्वं विभाति तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीत्यादि श्रुतय आत्मनः स्वप्रकाशत्वं बोधयंती
त्यर्थः १६ येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति वाक्यमर्थतः पठति येनेदं जानते सर्वं तत्केनान्येन
जानतां येन चैतन्यरूपेणात्मनेदं सर्वं दृश्यजातं जानन् ते प्राणिनस्तं साक्षिणमात्मानमन्येन केन साक्षिभूतेन जडेन जानतामवगच्छेयुः
पुमांसः अस्यैव वाक्यस्य तात्पर्यमाह विज्ञातारं केन विद्यात् दृश्यजातस्य विज्ञातारं केन दृश्यभूतेन विद्याज्जानीयात् न केनापि जानी
यादित्यर्थः ननु मनसा ज्ञास्यतीत्याशंक्याह शक्तं वेद्ये तु साधनं १७ साधनं तु मनो वेद्ये ज्ञातव्ये विषये शक्तं समर्थं न तु ज्ञातर्यात्मनि
नैव वाचा न मनसेत्यादि श्रुतेः तस्यापि ज्ञेयत्वे कर्मकर्तृत्वविरोधात् इति भावः १७ आत्मनः स्वप्रकाशत्वे एवं सवेत्ति वेद्यं न च तस्यास्ति वेत्ता
अन्यदेव तद्विदितादथो अविदितादधीति वाक्यद्वयमपि प्रमाणमिति मन्वानस्तद्वाक्यमर्थतः पठति सवेत्ति वेद्यं तत्सर्वं नान्यस्तस्यास्ति वेदि
ता विदिताविदिताभ्यां च एष बोधस्वरूपकं १८ स आत्मा यद्वेद्यं तत्सर्वं वेत्ति तस्यात्मनो वेदिता ज्ञाता अन्यो नास्ति सिद्धो बोधस्वरूपकं व

स्वविदिताविदिताभ्यां विदितं ज्ञातं ज्ञानेन विषयीकृतं न भविदितं मयेत्येतेनावृतं ताभ्यां एव ... पन्नादेवेत्यर्थः १८ अनुवि
दिताविदितातिरिक्तो बोधेनानुभूयत इत्याशंक्याविदितविलक्षणस्य वेदनस्य बोधपत्वान्न दनुभवाभावे विदितत्वस्याप्यनुभवाभावप्रसंगा
द्बोधानुभवो नवययमंगीकर्तव्य इति शंकापरिहारमाह बोधेप्यनुभवो यस्य न कथंचन जायते तं कथं बोधयेच्छास्त्रं लोष्टं नरसमाकृति १९
यस्यांशस्य बोधेपि घटादिस्फुरणरूपेणानुभवः साक्षात्कारः कथंचन कथमपि न जायते नोत्पद्यते तं नरसमाकृतिं नरसमानाकारं लोष्टं
लोष्टवज्जडं मनुष्यं शास्त्रं कथं बोधयेन्न कथमपि बोधयेदित्यर्थः १९ बोधेन बुध्यत इत्युक्तिरेव व्याहतेति सदृष्टांतमाह जिह्वा मेऽस्ति न वे
त्युक्तिर्लज्जायै केवलं यथा न बुध्यते मया बोधो बोद्धव्य इति तादृशी २० मे जिह्वास्ति न वेत्युक्तिर्भाषणं यथा लज्जायै केवलं लज्जाजनकं तथै
व भवति निर्बुद्धिमत्त्वज्ञापनाय जिह्वायाः सिद्धाभाषणानुपपत्तेः २० एवं मया बोधो न बुध्यत इत्युक्तिः परं बोद्धव्य इत्युक्तिरपि तादृशी लज्जाहेतु
रेव बोधेन विना तद्व्यवहारासिद्धेरित्यर्थः २० भवत्वेवं विधः स बोधस्तथापि प्रकृते ब्रह्मात्मबोधे किमायातमित्याशंक्याह यस्मिन्यस्मिन्
स्ति लोके बोधस्तत्र तदुपेक्षणे यद्बोधमात्रं तद्ब्रह्मेत्येवं धीर्ब्रह्मनिश्चयः २१ यस्मिन्यस्मिन्घटादिलक्षणे विषये बोधो ज्ञानमस्ति तत्तद
पेक्षणे तत्स्वरूपस्य घटादिविषयस्यापेक्षणेनाऽऽदरेणैवेतत्सति यद्बोधमात्रं घटादिषु सर्वेष्वनुस्यूतं यत्स्फुरणमात्रं तदेव ब्रह्मेत्येवंरूपा धीर्बुद्धि
र्द्विब्रह्मनिश्चयो ब्रह्मज्ञानमिति विवक्षितः २१ ननु घटादिविषयोपेक्षया तदर्थानुभवरूपं ब्रह्मावगम्यते चेत्तर्हि कोशपंचकविवेको निःप्रयो
जनः स्यादित्याशंक्य ब्रह्मणः प्रत्यग्रूपत्वज्ञानेन विना मोक्षासाधनत्वात्तस्य चाऽऽत्मबोधोपयोगित्वात्तस्यापि वैयर्थ्यमित्याह पंचकोशः

पत्निपागेमात्तिबोधावशेषतः स्वस्वरूपंमएवस्यात् पंचानांकोशानामन्नमयादीनांपरित्यागेशुद्धात्मानःस्वनिष्ठयेस्थितेतत्साक्षिरूप
स्यबोधस्यावशेषत्वात्साक्षिरूपोबोधएवस्वस्वरूपंस्वनिजंस्वरूपंब्रह्मैवस्यात् नन्वन्नमयादीनामहंभावसिद्धानांत्यागोशून्यपरिशे
षःस्यादित्याशंक्याह शून्यत्वेतस्यदूषितं २२ तस्यसाक्षिरूपबोधस्यशून्यत्वंदूषितंदुःसंपाद्यमित्यर्थः २२ दूषितत्वमेवोपपादयति यस्मि
तावत्स्वरूपंनाम स्वयंभवृन्वाच्यंस्वस्वरूपंलौकिकानांवैदिकानांचमतेनतावदस्त्येव कुतइत्यतआह विवादाविषयत्वतः स्वस्वरूपस्यविप्र
तिपत्तिविषयत्वाभावादित्यर्थः विपक्षेवाधकमाह स्वस्मिन्नपिविवादश्चेत्प्रतिवाद्यत्रकोभवेत् २३ स्वात्मन्यपिविप्रतिपत्तौसत्यामत्राम
स्योविप्रतिपत्तौकःप्रतिवादीभवेन्नकोपीत्यर्थः २३ ननुस्वात्मनस्तवाद्येप्रतिवादीभविष्यतीत्याशंक्यातथाविधःकोपिनास्तीत्याह स्वा
त्मत्वेनहिकश्चिद्दाचनेविभ्रमंविना भ्रांतिमेकांविहायान्यस्यादृशायंसाक्षिस्वाभावःकेनापिनांगीक्रियतइत्यर्थः कुतएवंनिश्चीयतइत्या-
शंक्याह अतएवश्रुतिर्बोधंब्रूतेचासत्त्ववादिनः २४ यतःकस्मैचिन्नरोचते तत्रएवश्रुतिरसत्त्ववादिनोबाधंब्रूते २४ केयंश्रुतिरित्याकां
क्षायामसन्नेवस्यादित्यादिकांतांश्रुतिमर्थतःपठति असद्ब्रह्मेतिचेद्वेदस्वयमेवभवेदसन् यदिब्रह्मासदितिजानीयात्तर्हिस्वयमेवब्रह्म
णोऽसत्वज्ञानीअसन्भवेत्तस्यैवब्रह्मरूपत्वादित्यर्थः फलितमाह अतोस्यमाभूद्वेद्यत्वंस्वसत्वंत्वभ्युपेयतां २५ इदानीमात्मनःस्वप्रका
शत्वंकथंतुकामस्तस्यवेद्यत्वाभावेकीदृक्स्वरूपमितिप्रश्नमुत्थापयति कीदृक्तर्हीतिचेत्पृच्छेत् अयमभिप्रायः आत्मनइदंतयादिनाकेनचि
द्रूपेणवेद्यत्वांगीकारेतेनैवरूपेणवेद्यत्वंस्यात्तदनंगीकारेऽस्मन्स्वमितिसत्यमीदृक्त्वाद्यंगीकारेतस्मैस्वेद्यत्वंतत्तुनांगी[illegible]इत्याह

36

सत्य

ऽदृश्यत्वान्नित्यत्वं हि उपलक्षणमेतत्साक्षित्वस्यापि उभयाभावविषमेदाह यद्यपीति गतार्थत्वान्नास्य स्वरूपेणैव निष्कृष्ट २८ तदेवं प्रतिज्ञातात्रे
णार्थसिद्धिरित्याशंक्य वेदान्ता हृदयं कृत्वा दृष्टयोरर्थमभिप्रायान्तरं दृष्टवाच्यत्वमुपपादयति अत्रात्मा णं विषयत्वाददृष्टत्वं रेत्यामुच्यते विष
यीनाम्न विषयः स्वत्वान्नान्यस्य परोक्षता १२ प्रत्यक्षस्यैव दृष्टादेरीदृक् साक्षाद्वाच्यत्वं दृष्टं परोक्षस्यैव धर्माधर्मादेस्तादृक् साक्षाद्वाच्यत्वं दृष्टं दृष्ट
त्वमनहमिन्द्रियजन्यज्ञानविषयत्वाभावान्नेदृक्त्वं सत्वे नैव परोक्षत्वाभावान्नादृक्त्वमिति भावः १२ तर्हि शून्यमिति द्वितीयं पक्षं फलप्रद
र्शनव्याजेन परिहरति अवेद्योप्यपरोक्षोऽतः स्वप्रकाशो भवत्ययं इन्द्रियजन्यज्ञानविषयत्वाभावेप्यपरोक्षत्वात्स्वप्रकाशश्चेत्यर्थः अत्रायं प्र
योगः आत्मा स्वप्रकाशः संवित्कर्मतामन्तरेणापरोक्षत्वात् संवेदनवदिति न च विशेषणासिद्धो हेतुः आत्मनः संवित्कर्मत्वे कर्तृकर्म
भावविरोधप्रसंगात् स्वस्वरूपेण कर्तृत्वविशिष्टरूपेण कर्मत्वमित्यविरोध इति चेन्न गमनक्रियाया मध्ये कस्यैव स्वस्वरूपेणैव कर्तृत्वविशिष्ट
रूपेण कर्मत्वमित्यति प्रसंगात् न च साधनविकलो दृष्टान्तः संवेदनस्य वेदनान्तरापेक्षायामनवस्थानादिति नन्वात्मनः स्वप्रकाशत्वे
सिद्धेपि तु तल्लक्षणभावान्न ब्रह्मत्वसिद्धिरित्याशंक्य तल्लक्षणं तत्र योजयति सत्यं ज्ञानमनन्तं चेत्यस्तीह ब्रह्मलक्षणं १८ सत्यं ज्ञानमनः
न्तं ब्रह्मेति श्रुत्या यद्ब्रह्मलक्षणमुक्तं तादृशमात्मनि विद्यत इत्यर्थः १८ आत्मनः सत्यत्वोपपादनाय तावत्सत्यत्वलक्षणमाह सत्य
त्वं बाधराहित्यं बाधशून्यत्वं सत्यत्वं सत्यमबाध्यं बाध्यं मिथ्येति तद्विवेक इति पूर्वाचार्यैरुक्तत्वात् ननु प्रकृते किमायातमित्यत आह जग
द्बाधैकसाक्षिणः बाधः किं साक्षिको ब्रूहि जगतः स्थूलसूक्ष्मशरीरादिलक्षणस्य यो बाधः सुषुप्तिमूर्छासमाधिषु विद्यमानतानन्तसाक्षित्वेनैव

पं. को. वि.

वर्त्तमानस्यात्मनो वाधः किं साक्षिकः कः साक्षी अस्य वाधस्यासौ किं साक्षिको नत्कोपि साक्षी विद्यत इत्यर्थः अस्साक्षिकोप्यात्मवाधः किं न स्या-
दित्याशंक्याह नत्वसाक्षिक इष्यते २९ साक्षिरहितो वाधो नाभ्युपगंतव्योऽन्यथातिप्रसंगादिति भावः २९ उक्तमर्थं दृष्टांतेन स्पष्टय-
ति अपनीतेषु मूर्त्तेषु ह्यमूर्त्तं शिष्यते वियत् शक्येषु वाधितेष्वंते शिष्यते यत्तदेव तत् ३० मूर्त्तेषु गृहादिगतेषु घटादिष्वपनीतेषु
गृहादिस्थो निःसारितेषु सत्सु यथापनेतुमशक्यं नभ एवावशिष्यते एवं सर्वव्यतिरिक्तेषु मूर्त्तामूर्त्तेषु देहेंद्रियादिषु निराकर्त्तुं शक्ये-
षु नेति नेति श्रुत्या निराकृतेषु सत्सु अंते अवसाने सर्वनिराकरणसाक्षित्वेन योऽवबोधोऽवशिष्यते स एव वाधरहित आत्मेत्यर्थः ३० ननु
प्रतीयमानस्य सर्वस्यापि निषेधे किंचिन्नावशिष्यते तत्कथं शिष्यते यत्तदेव तदित्यवशिष्टस्यात्मत्वमुच्यते इति शंकते सर्ववाधे न किंचि-
च्चेत् नकिंचिदवशिष्यत इति वदतापि तथाप्रयोगासिद्धेः सर्वाभावविषयं ज्ञानमवश्यमभ्युपेतव्यमतस्तदेवास्मदभिमतमा-
त्मस्वरूपमित्यभिप्रायेण परिहरति यन्नकिंचित्तदेव तत् नकिंचिदिति शब्देन यच्चैतन्यमुच्यते तदेव तद्ब्रह्मेत्यर्थः नकिंचिदित्यभाव-
वाचकेन नकिंचिच्छब्देन कथं चैतन्यमुच्यत इत्याशंक्य वाधसाक्षिणोऽवश्यमभ्युपेयत्वादभिधायकशब्दे एव विप्रतिपत्तिर्नाभिधेये इ-
ति परिहरति भाषा एवात्र भिद्यंते निर्वाधं तावदस्ति हि ३१ अत्र वाधसाक्षिणि प्रत्यगात्मनि भाषा एव नकिंचिन्मात्रमित्यादिशब्दा ए-
व भिद्यंते निर्वाधं वाधरहितं साक्षिचैतन्यं तु विद्यत एवेत्यर्थः ३१ उक्तमर्थं श्रुत्या द्रढयति अत एव श्रुतिर्वाध्यं वाधित्वा शेषयत्य-
दः स एष नेति नेत्यात्मेत्यतद्व्यावृत्तिरूपतः ३२ यतः साक्षिचैतन्यमवाध्यमत एव नेति नेतीत्यात्मेति श्रुतिरतद्व्यावृत्तिरूपतो नात्मपदा-

38

सद्रूपेऽद्वैते न तद्रूपे द्वैते च यदन्योन्याध्यासलक्षणमेकयज्ञानमस्ति तस्यैवाथ मस्यात्कालीनामत्तयोरद्वैते द्वैते ... सत्यानृ
तेन्द्रूपेण भेदबुद्धिरेव नापरोक्षमानदेहपातः त्वपि: १०४ इदानीं लोकप्रसिद्धार्थदृष्टान्तोऽपि न दोषस्त्वभिप्रायेणाह यद्वान्तकाल
प्राणस्य वियोगो लुप्रसिद्धितः तस्मिन्कालेऽपि न भ्रान्तिर्गतायाः पुनरागमः १०५ उक्तमेवार्थं प्रपंचयति नीरोगस्तूपविष्टो वा रुग्णो वा र
विलुठन्भुवि मूर्छितो वा त्यजत्वेष प्राणान्भ्रान्तिर्न सर्वथा १०६ ननु प्राणवियोगकाले मूर्छादिना शिभ्रान्तिः स्यादेवेत्याशंक्य ज्ञानजावि
भावेदृष्टान्तमाह दिने दिने स्वप्नसुप्त्योरधीते विस्मृतेऽप्ययम् परेद्युर्नानधीतः स्यात्तद्वद्विद्या न नश्यति १०७ यथा प्रत्यहमधीते वेदे स्वप्नसु
प्तावस्थायां विस्मृतेऽपि परेद्युरनधीतवेदत्वं नास्ति तथान्तकालेऽपि तत्त्वानुसंधानाभावेऽपि ज्ञाननाशाभावस्तत्वपि: १०७ ज्ञानेनाशाः
वमेवोपपादयति प्रमाणोत्पादिता विद्या प्रमाणं प्रबलं विना न नश्यति न वेदान्तात्प्रबलं मानमीक्ष्यते १०८ उपपादितमर्थमुपसंहरः
ति तस्माद्वेदान्तसंसिद्धं सदद्वैतं न बाध्यते अन्तकालेऽप्यतो भूतविवेकान्निर्वृतिः स्थिता १०९ इति महाभूतविवेकतात्पर्यदीपिकास
मास्याद्वितीया २ ॐ ॐ ॐ ॐ ॐ ॐ ॐ

ॐ ॐ

२ भू॰ ५

39

कस्मायानां भ्रमत्वे त्वं न वासिते सद्वस्त्वद्वैतमित्येवाधीर्विपर्येति न कचित् ९८ भूतानामाकाशादीनां भौतिकानां ब्रह्मांडादीनां मायया
यास्तत्कारणभूताया मिथ्यात्वे विवेकप्यातुभ्यां चित्ते दृढवासिते सति वद्द्वस्तु नोऽद्वैतमबुद्धिः कदाचिन्न विहन्यत इत्यर्थः ९९ ननु
भूम्यादीनामसत्त्वे विदुषो व्यवहारलोपः प्रसज्येतेत्याशंक्य विवेकेन मिथ्यात्वनिश्चयेपि भूम्यादेः स्वरूपोपमर्दनाभावान्न व्यवहारो
लुप्यत इत्याह सदद्वैतात्पृथग्भूते द्वैते भूम्यादिरूपिणि तत्तदर्थक्रियालोके यथादृष्टा तथैव सा ९९ ननु सांख्यस्याद्वैतरूपत्वे सांख्या
दिभिरभिधीयमानस्य भेदस्याकुलत्वनिरासः क्रियत इत्याशंक्य व्यावहारिकभेदस्यास्माभिरप्यभ्युपगतत्वान्न तन्निरासप्रयत्न इत्या
ह सांख्यकाणादबौद्धाद्यैर्जगद्भेदो यथायथा उत्प्रेक्ष्यतेनेकयुक्त्या भवत्विष्ट तथा तथा १०० ननु प्रमाणसिद्धस्य सत्त्वभेदस्यावज्ञानु
पपन्नेत्याशंक्याह अवज्ञातं सदद्वैतं निःशंकैरन्यवादिभिः एवंकाचान्निरस्माकं तद्द्वैतमवजानतां १०१ यथान्यवादिभिः सांख्यादिभि
र्निःशंकैः श्रुत्यादिसिद्धस्यापि सदद्वैतस्यावज्ञा क्रियते श्रुतियुक्त्यनुभवावष्टंभेनास्माकं तदीयद्वैतानादरेण किं हीयत इत्यर्थः १०२
ननु निष्प्रयोजने यद्वैतावज्ञेत्याशंक्य जीवन्मुक्तिलक्षणप्रयोजनसद्भावान्नैवमित्याह द्वैतावज्ञा सुस्थिता चेदद्वैते धीः स्थिरा भवेत् स्थै
र्ये तस्याः पुमानेष जीवन्मुक्त इतीर्यते १०३ नैकवलं जीवन्मुक्तिरेव प्रयोजनमपि तु विदेहमुक्तिरपीत्यस्मिन् प्रायेण कृष्णवाक्यमुदाहरति
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति स्थित्वास्यामन्तकालेपि ब्रह्मनिर्वाणमृच्छति १०४ अंतकालशब्देन वर्तमानदेहपाता
भिधीयत इत्याशंक्यानिवारयितुं विवक्षितमर्थमाह सदद्वैतेन्यतद्वैते यदन्योन्यैकवीक्षणं तस्यांतकालस्तद्भेदबुद्धिरेव न चापरः १०५

श्री पं॰ टी॰ ९

५१

९

अनुगता इत्याह पूर्वानुगतिरत्र च केते धर्मा इत्याशंक्याह अस्ति वह्निः सनिःशब्दः सरूपवान्स्पर्शवानिति ७९ एवमसौ कारणध-
र्मानुगमानुवादपूर्वकं स्वीयं धर्मं दर्शयति सन्मायाव्योमवाय्वंशैर्युक्तस्याग्नेर्निजो गुणः रूपं इत्थं सविशेषणं वह्निस्वरूपं प्रदर्श्य तस्याद्य इ-
दानीमस्य वस्तुनो वह्निं विवेचयति तत्र सतः सर्वमन्यद्बुद्ध्या विविच्यतां ८० तत्रैतेषु मध्ये सतः सद्वस्तुनोऽन्यत्सर्वं धर्मजातं मिथ्येति बुद्ध्या
विविच्यतां पृथक्क्रियतामित्यर्थः ८० एवं वह्नेर्मिथ्यात्वनिश्चयानंतरमपां मिथ्यात्वं चिंतयेदित्याह सतो विविक्ते वह्नौ मिथ्यात्वे वास्थि-
ते सति आपो दशांशतो न्यूनाः कल्पिता इति चिंतयेत् ८१ अपां विकाराणां धर्मजातं च विभज्य दर्शयति संत्यापोऽमूः शून्यतत्त्वाः स-
शब्दस्पर्शसंयुताः रूपवत्योऽन्यधर्मानुवृत्त्या स्वीयो रसो गुणः ८२ सत्त्वेन सह वर्तंत इति सशब्दाः सशब्दस्य आसौ स्पर्शश्च सशब्दस्पर्शास्तैः सं-
युक्ता इत्यर्थः ८२ विवेकध्यानाभ्यामपां मिथ्यात्वनिश्चयानंतरं भूमेर्मिथ्यात्वं चिंतनीयमित्याह सतो विवेचितासु अप्सु तन्मिथ्यात्वे च वास्थि-
ते भूर्मिदशांशतो न्यूना कल्पिता प्रात चिंतयेत् ८३ तस्या मिथ्यात्वं चिंतनाय तद्धर्मानपि विभजते अस्ति भूस्तत्त्वशून्यासौ शब्दस्पर्शौ स-
रूपैका रसस्वपरतो गंधो निजः तेभ्यः सत्तामात्रं पृथक्कर्तव्यमित्याह सत्ता विविच्यतां ८४ सत्तापृथक्करणफलमाह पृथक्कृतायां सत्ता-
यां भूमिर्मिथ्यावशिष्यते इदानीं भौतिकेभ्यो ब्रह्मांडादिभ्यः सतो विवेचनाय तत्स्वरूपानुप्रकारं दर्शयति भूमेर्दशांशतो न्यूनं ब्रह्मांडं भू-
मिमध्यगं ८५ ब्रह्मांडमध्ये [illegible]तिभुवनानि चतुर्दश भुवनेषु वसंत्येषु प्राणिदेहा यथायथं ८६ तेषु सद्विवेचने फलमाह ब्रह्मांडलो-
कदेहेषु सद्वस्तुनि पृथक्कृते च [illegible]चेंडादयो भांतु तज्ज्ञाने पीरहकालनतिः ८७ तज्ज्ञाने पीद्दकालनतिरित्युक्तमेवार्थं स्पष्टीकरोति भूतभौति-

ॐ श्रीगणेश
ये मा योन
विंतं गृंथं
मे व्योमत्रि
ग्रानां पंचवं
सुतानुहा
प्राणः प्राणान
तो विज्ञानमम
नमपस्मत्र
भुतात्मवीह
विकारः मग्रात
दाथसितोरदस्त्रा

॥ तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥१४॥ यदि दिवा । यदि नक्तमे
नांसि चकृमा वयम् ॥ वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥१५॥ यदि जाग्र
त् ॥ यदि जाग्रद्यदि स्वप्न ऽएनांसि चकृमा वयम् ॥ सूर्यो मा तस्मादेनसो विश्वान्मु
ञ्चत्वंहसः ॥१६॥ यद्ग्रामे । यदरण्ये यत्सभायां यदिन्द्रिये ॥ यच्छूद्रे
यदर्ये यदेनश्चकृमा वयं यदेकस्याधि धर्मणि तस्यावयजनमसि ॥१७॥ यदापो
यदापो ऽअघ्न्या ऽइति वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ अवभृथ निचुम्पुण
निचेरुरसि निचुम्पुणः ॥ अव देवैर्देवकृतमेनोऽयक्ष्यव मर्त्यैर्मर्त्यकृतं पुरुरा
व्णो देव रिषस्पाहि ॥१८॥ समुद्रे ते ॥ समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वो
षधीरुतापः ॥ सुमित्रिया न ऽआप ऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥१९॥ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मला

१०११

५५

॥ उँ ॥

ॐ श्रीगणेशाय नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ पंचकोशविवेकस्य व्याख्यां कुर्वे समासतः १ तैत्तिरीयोपनिषद्वाक्
यव्याख्यानरूपंपंचकोशविवेकाख्यंप्रकरणमारभमाणआचार्यस्तत्र श्रोतृप्रवृत्तिसिद्धये सप्रयोजनमभिधेयं सूचयन्नुक्तच्चिकी
र्षितं ग्रंथं प्रतिजानीते गुहाहितं ब्रह्म यत्तत्पंचकोशविवेकतः बोद्धुं शक्यं ततः कोशपंचकं प्रविविच्यते १ यो वेद निहितं गुहायां पर
मे व्योमन्निति श्रुत्या गुहानिहितत्वेनाभिहितं यद्ब्रह्मास्ति तद्गुहाशब्दवाच्यान्नमयादिकोशपंचकविवेके न ज्ञातुं शक्यते यतः ततस्तेषां को
शानां पंचकं प्रकर्षेण प्रत्यगात्मनः सकाशाद्विभज्य प्रदर्श्यत इत्यर्थः १ ननु केयं गुहा यस्यां निहितं ब्रह्म कोशविवेकेनावबुध्यत इत्याशंक्य
श्रुत्या गुहाशब्देन विवक्षितमर्थमाह देहादाभ्यंतरः प्राणः प्राणादाभ्यंतरं मनः ततः कर्ता ततो भोक्ता गुहा सेयं परंपरा २ देहादन्नमयात्
प्राणः प्राणमय आभ्यंतरः प्राणमयान्मनो मनोमय आभ्यंतरः ततो मनोमयात्कोशात्कर्ता विज्ञानमय आभ्यंतर इत्यनुषज्यते स
तो विज्ञानमयाद्भोक्तानंदमयः सोपि पूर्ववदांतर इत्यर्थः सेयमन्नमयाद्यानंदमयांता कोशपरंपरा गुहाशब्देनोच्यत इत्यर्थः २ इदानीम
न्नमयस्य स्वरूपं तदनात्मत्वं च दर्शयति पितृभुक्तान्नजाद्वीर्याज्जातोन्नेनैव वर्धते देहः सोन्नमयो नात्मा पितृभुक्तान्नजात् मातापितृभ्यां
भुक्तात् व्रीह्यादिलक्षणादन्नाज्जायमानं यद्वीर्यमस्ति तस्माद्वीर्याज्जातो देहो जातो यश्चान्नेनानंतरं क्षीराद्यन्नेनैव वर्धते स देहोन्नमयोन्नस्य
विकारः स आत्मा न भवति कुत इत्यत आह प्राक्चोर्ध्वं तदभावतः ३ जन्मनः प्राक् ऊर्ध्वं तदभावात्तस्य देहस्याभावादित्यर्थः विदा
दाथसितो देह आत्मा न भवति कार्यत्वाद्घटवदिति ३ ननु देहस्तु रक्तमाद्यं मा भूद्विपक्षे बाधकाभावादप्रयोजको हेतुरित्याशंक्याह कृताकृताभ्याग

पं॰ को॰ वि॰ टी॰ ॥ ३ ॥

45

ॐ ॥ ३ ॥

तदात्मानन्दत्वमुच्यते १२ अस्तिभातीतिव्यवहारार्हं वस्तुन्यस्तिविद्यते भाति प्रकाशत इत्येवं प्रकारं व्यवहारमर्हतीत्यस्तिभातीतिव्यवहा
रार्हं तच्च न तद्वस्तु चेत्ति तथा तस्मिंस्तं एवं चेत् व्यवहारं निरस्य निराकृत्य विरुद्धस्य नास्ति न भातीत्येवंरूपस्य तस्य व्यवहारस्योत्पादनं जन
नं प्रतिबंध उच्यते १३ उक्तलक्षणस्य प्रतिबंधस्य कारणं दृष्टांतदार्ष्टांतिकयोः क्रमेण दर्शयति तस्य हेतुः समानाभिहारः पुत्रध्वनिश्रु
तौ इहानादि[illegible]विषये व्यामोहैकनिबंधनं १४ पुत्रध्वनिश्रुतौ पुत्रध्वनिश्रवणलक्षणे दृष्टांते तस्य प्रतिबंधस्य हेतुः कारणं समानाभि
हारो बहुभिः सह पठने इह दार्ष्टांतिके व्यामोहैकनिबंधनं व्यामोहो नाम विपरीतज्ञानं नामैकनिबंधनं मुख्यकारणं मनादिसिद्धत्वात्तिरः
हिताऽविद्या वक्ष्यमाणा प्रतिबंधस्य हेतुरित्यर्थः १४ इदानीं प्रतिबंधहेतुमविद्यां व्युत्पादयितुं तन्मूलभूतां प्रकृतिं व्युत्पादयति चिदा
नंदमयब्रह्मप्रतिबिंबसमन्विता तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा १५ सच्चिदानंदरूपं ब्रह्म तस्य प्रतिबिंबेन प्रतिच्छायया समन्वि
तायुक्ता तमोरजःसत्त्वगुणा सत्त्वरजस्तमोगुणानां साम्यावस्था या सा प्रकृतिरित्युच्यते सा च द्विविधा द्विप्रकारा भवति चकारादुक्तम
र्थप्रकारांतरं सूचयति १५ तद्वैविध्यमेव दर्शयति सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते सत्त्वस्य प्रकाशात्मकस्य गुणस्य शुद्धिः
गुणांतरेणाकलुषीकृतता अविशुद्धिर्गुणांतरेण कलुषीकृतत्वं ताभ्यां सत्त्वशुद्ध्यविशुद्धिभ्यां ते च द्विविधे मायाविद्ये मायेत्यविद्येति
च मते संमते विशुद्धसत्त्वप्रधाना माया मलिनसत्त्वप्रधानाऽविद्येत्यर्थः यदर्थं मायाविद्ययोर्भेद उक्तस्तदिदानीं दर्शयति मायाबिंबो
वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा मायाबिंबो मायायां प्रतिबिंबितश्चिदा[illegible] तां मायां वशीकृ
१६

स्यात्तथाविधं सच्चिदानंदरूपं परं ब्रह्म तत्त्वपदार्थः तयोस्तत्त्वंपदार्थयोरैक्यमखंडैकरूपत्वं श्रुत्यंतेषु वेदांतेषु पदि[illegible]तं प्रतिपाद्यत इत्यः

तो न वेदांतानां निर्विषयत्वमित्यर्थः १० आत्मनः परमानंदरूपत्वमादिशति स्वभानेन परं प्रेमभानेन विषयी[illegible]हा परमानंदत्वेन

भासते भासते वा ऽभाने ऽप्रतीतो न परं प्रेमात्मनि निरतिशयस्नेहो न स्यात् विषयसौंदर्यज्ञानजन्यत्वान्न स्नेहस्य भाने प्रतीतो तु विषये

सुखसाधने सुखादौ तज्जन्ये सुखे वा स्नेहे ऽज्ञानस्यात् फलप्राप्तौ सत्यां साधनेच्छानुपपत्तेः नित्यनिरतिशयानंदलाभे सति हानौ के सा ऽ

धनपारं ते स्याद्दृष्टदोषदूषिते वैषयिकसुखे स्नेहा ऽयोगाच्च तस्मान्नानंदरूपत्वात्मन्यनुपपन्नेति प्रकारांतरस्यासंभवान्नैवमितिपरि

हरति अतो भानेप्यभातासौ परमानंदतात्मनः ११ यतो भानाभानपक्षयोरुभयोरपि दोषोस्ति अतः कारणादात्मनोसौ परमानंद

ता भानेपि प्रतीतो ऽसत्यामप्यभाता न प्रतीता भवति ११ नन्वेकस्य युगपद्भानाभानेन युज्येते ऽत्याशंक्य किंचिदमयुक्तत्वमह दृष्टचवत्व

सुपठन्निरहितं तं वानाद्य ऽत्याह अध्येतृवर्गमध्यस्थपुत्राध्ययनशब्दवत् भानेप्यभाने अध्येतॄणां वेदपाठकानां वर्गः समूहस्तस्य

मध्ये तिष्ठतीत्यध्येतृवर्गमध्यस्थः स चासौ पुत्रश्चेति तस्याध्ययनं तत्कर्तृकं पठनं तस्य शब्दो ध्वनिः यथा तत्सुतस्य पितुर्भासमानोपि ऽ

सामान्येनाभासते न विशेषतो ऽयं मत्पुत्रध्वनिरिति तथानंदस्यापि भानेप्यभाने भवतीत्यर्थः द्वितीयं प्रत्याह भानस्य प्रतिबंधेन युज्यते

१२ भानेप्यभानमित्येतदाप्यनुसंजनीयं भानस्य स्फुरणस्य प्रतिबंधेन वक्ष्यमाणलक्षणेन भानेप्यभानं सामान्यतः प्रतीतावपि विशे

षाकारेण प्रतीतिर्युज्यत उपपद्यत इत्यर्थः १२ कोसौ प्रतिबंध इत्यत आह प्रतिबंधोस्ति भातीति व्यवहारार्हवस्तुनि तं निरस्य विरुद्धस्य

तत्सुखास्पदं विषयस्तस्मात् अत्रेदमनुमानं आत्मा परमानंदरूपः परप्रेमास्पदत्वात् यः परमानंदरूपो न भवति नासौ परप्रेमास्पदं यथा
विषयघटः तथा चायं परप्रेमास्पदं न भवति तस्मात्परमानंदरूपो न भवति नन्वात्मनि पिद्धमिति हेतुरसिद्ध उपलभ्यमानत्वात्प्रेमास्पदत्वे
वासिद्धं कुतः परप्रेमास्पदत्वमित्याशंक्य तस्य दुःखसंबंधनिमित्तकत्वेनान्यथासिद्धत्वात्प्रेमास्पदत्वात्मन्यनुभवसिद्धमात्रेवमिति परिहरति
मा न भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते ८ हि यस्मात्कारणादात्मनि विषये मा न भूवमहं मा भूवमिति ममासद्भावः कदापि मा भूत् किं
तु भूयासं सर्वदा सत्त्वमेव मम भूयात् इत्येवंविधमात्मनि प्रेमेक्ष्यते सर्वैरनुभूयतेऽतो नासिद्धिरित्यर्थः ८ मा भून्न[illegible] प्रेमाणः
द्वेषप्रमाणाभावाद्विशेषणासिद्धिरित्याशंक्याह तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि अतस्तत्परमं ति अन्यत्रस्वातिविषयेषु
जातं यत्प्रेम तदात्मार्थं तेषामात्मशेषत्वनिमित्तकमेव न स्वाभाविकमेवमात्मनि दृश्यमानं प्रेमान्यार्थं नात्मनोऽन्यशेषत्वनिमित्तकं न भव
ति किं त्वात्मनिमित्तकमेव अतो निरुपाधिकत्वात्तत्परमं निरतिशयं फलितमाह तेन परमानंदतात्मनः ९ तेन निरतिशयप्रेमास्पद
त्वेनात्मनः परमानंदता निरतिशयसुखरूपत्वं सिद्धं ९ एतैः सप्तभिः श्लोकैः प्रतिपादितमर्थं संक्षिप्य दर्शयति इत्थं सच्चित्परमानंद आ
त्मा युक्त्येति शब्दस्पर्शादयोऽत्यादिना ज्ञानस्य नित्यत्वे प्रमाणं तस्यैव इयमात्मेत्यात्मत्वप्रसाधनेनात्मनः सच्चिद्रूपत्वं समर्थितं परानंद इत्या
दिना च परमानंदरूपत्वं समर्थितं अत आत्मा महावाक्ये त्वंपदार्थः सच्चिदानंदरूपः सिद्धः ननु [illegible]स्यात्मनो मुक्तौ वावगतावुप
निवद्यो निर्विषयत्वेनाप्रामाण्यप्रसंग इत्याशंक्याह तथाविधं परं ब्रह्म तयोश्चैक्यं श्रुत्यंतेषूपदिश्यते १० तथा[illegible] इत्थंविधाप्रकारेण य

४७

कथयन्नुक्तन्यायमन्यत्राप्यतिदिशत्येवमित्यादिना एवं स्वप्नजवेद्येऽप्येका संविन्न हि दिनांतरे ६ मासाब्दयुगकल्पेषु गतागम्येष्वनेकधेति
स्यात्तद्वेद्ये एकदिनवर्त्तिनि जाग्रदाद्यवस्थात्रयेऽपि संविदैकैव सर्वदा कः संशयः समाव धारणमिति न्यायात् तद्दिनांतरेष्वपि यथैकस्मिन्दिवसे वः
स्थात्रये विज्ञानस्याभेद एवमन्यस्मिन्नपि दिवसेऽनेकधाऽनेकप्रकारेण गतागम्येष्वतीतानागामिषु मासेषु चैत्रादिष्वब्देषु प्रभवादिषु युगेषु कृ
तादिषु कल्पेषु ब्राह्मादिषु च ज्ञानस्याभेद एवेत्यर्थः संविदेकत्वसमर्थनेन फलमाह नोदेति नास्तमेत्येका संविदिति अतो नोदेति नोत्प
द्यते नास्तमेति न विनश्यति चाद्यादिकयोरुत्पत्तिविनाशयोरसिद्धेः स्वोत्पत्तिविनाशयोरप्येवं संविदा ग्रहीतुमशक्यत्वात्संविदं तदभावा
च्चेति भावः ननु संविदं तदभावे ग्राहकाभावाद्स्याप्यभावे जगदांध्यं प्रसज्येतेत्यत आह एषा स्वयंप्रभेति ७ अत्रायं प्रयोगः संवित्
स्वयंप्रकाशा अवेद्यत्वे सत्यपरोक्षत्वात् व्यतिरेके घटवत् न चायं विशेषणासिद्धो हेतुः संविदः स्वसंवेद्यत्वे कर्मकर्तृत्वविरोधात्परवेद्यत्वेन
वस्थानात् अतः स्वप्रकाशत्वेन भासमानायाः संविदः सर्वावभासकत्वं भवान्न जगदांध्यप्रसंग इति भावः ७ भवत्वेवं संविदो नित्यत्वं स्व
प्रकाशत्वं च ततः किमित्यत आह इयमात्मेति अत्रायं प्रयोगः इयं संविदात्मा भवितुमर्हति नित्यत्वे सति स्वप्रकाशत्वात् यन्नैवं न तदेवं य
था घट इति आत्मनो नित्यसंविद्रूपत्वप्रसाधनेन सत्यत्वमपि साधितं भवति नित्यस्यानित्यत्वे सत्यत्वाभावात् नित्यत्वं सत्यत्वं तद्यस्यास्तीति तदि
त्यं सत्यमिति वाचस्पतिमिश्रैरुक्तत्वादिति भावः आत्मन आनंदरूपत्वं साधयति परानंद इति आत्मेत्यनुषज्यते परश्चासावानंदश्चेति प
रानंदो निरतिशयसुखरूप इत्यर्थः तत्र हेतुमाह परप्रेमास्पदं यत इति यतो यस्मात्कारणात्परस्य निरुपाधिकत्वेन निरतिशयस्य प्रेम्णः

कसंकेतेन कल्पिता उत्तंसीकृता संकेतितत्तरुतले मया आगत्वा परावृत्तमिति राधा प्रत्ययार्थमिति भावः। रसालस्य आम्रस्य तस्यैव संकेतितत्वादिति भावः। त[illegible] पगुच्छ विशेषः तया पिंजरीकृतं पिंगलीकृतं परागसंसर्गादिति भावः। कपोलमंडलं गंडस्थलं यस्य सः कर्णपदं[illegible] येयं मंजरी केवलं श्रवणयोरपातथात्वदुदीरितं केवलं श्रवणयो ग्यमेव न त्वनुभवयोग्यमिति संकेतपालनराहित्यं व्यंजयति। कल्पितपदं यथा न कथमपि रसालमंजर्याः परागाग मस्तथा संस्थापनेन कतिपयाधिककालावस्थायितया संकेतस्य प्रियत्वं राधाया स्तथाविधप्रत्यययात्मदनस्य च रूपकत्वं च घातयति। रसालपदं स्पृहणीयत्वं ध्वनयति। षष्ठी च विरहकातरत्वं व्यनक्ति। मंजरीपदेन परिमलबहु लत्वं व्यज्यते। स्त्रीलिंगनिर्देशेन सलीलग्रहणयोग्यत्वमावेद्य। पिंजरीकृतपदं कर्णसंगमत्र रसालरसालमंजर्याः प्राप्य तावादवे तन्नस्य गंडस्यापि पांडुरता संजायते। किमुत स[illegible]तनस्येति विरहभीरुता मावेदयति मधुरिपुम घोर्दैत्यस्य शत्रोः कृष्ण मधुपदं उन्मादकत्वं ध्वनयति। तत्र दुराधर्षत्वं रिपुपदं तत्र योगिकवैरवत्त्वया जगद्विदि तवैभवत्वं व्यंजयति। तत्र श्रवणस्याद्य दर्शनयोग्यत्व उभा[illegible] कठिनहृदयत्वं तत्र स्वकृतिसंज्ञातसंकेत विघातजनितमन्युतया दुःखापदर्शनीयत्वं घोतयति। अतएव निःपत न्नयनवारिधारया निःपतंती निःसरंती नयनयोः नेत्रयोर्वारिधारा जलधारा यस्याः सा संकेतितैस्तल[illegible]गमनज्ञापकमंजरीदर्शनेन मयैव तत्र मंद भाग्यया न गतमिति विषादेनेति भावः। धारापदेन दुःखातिशयो व्यज्यते। राधयाराधयति तिराधा तया एवं च मधुरिपुसंगमेकचिंतत्वं ध्वन्यते निरीक्ष्यते विलोक्यते निरीक्ष्यते इति पदं कर्त्रव्यतामूढत्वं व्यनक्ति। रघोकृता

ति। २ [illegible]

53

ति॰ किंच भुजापर्यस्तकर्णोत्पलं भुजामांवाहो भुजांचगुर्वीमिति माघी अत्रयोगदर्शनात्। भुजाशब्दस्त्रीलिंगोप्य
स्तिपर्यस्तं पतितं कर्णोत्पलं अवतंसीकृतमिति भावः। एवंच मद्भुजायांकदालव्करकमलसंगेन विष्यतीत्यालिं
गनोत्कंठ्यंध्वन्यते। तथास्फुरदंगुलीयकरुचा। स्फुरंती दीप्यमाना। अंगुलीयकस्य ऊर्मिकायाः अंगुलीय
कमूर्मिकेत्यमरः। रुक् कांतिर्यस्यातया एवंच भूषणस्यापि शोभाजनकतयाशोभातिशयोध्वन्यते। अंगुल्यागंड
स्यकपोलस्यखंडयनं कुर्वाणा विदधती। एवंच मत्कपोलेत्वयास्वकरेण पत्रवल्ली विरचनीयेतिव्यंजयति
कर्णस्यतिपाठेत्वद्वचनामृतपात्रतातिमुखस्यकर्णस्यभवतिति ध्वनयति। नृपकन्यका राजकन्यका नृपपद
दुःशायत्वव्यनक्ति। यद्वा इतरसंरक्षकस्यस्त्रीयकन्यारक्षणेकिंकाठिन्यमिति तत्यावि धरक्षणादपरिहारपु
रःसरावलोकनेनातिवररपल्कसुकृतिनंसुकृतपरिपालवंतंयुवानंयस्य द्रुतेसयूपडुतिवता। यमालोक्तेस
सुखीतिवचनव्यक्तिस्वव्याजंताद्दशचेष्टाछि। साकूतंरव्यापयंती किमपिव्याजोद्भूतयाविश्वधार्ष्ट्यभावादिति
भावः। सखीसान्निध्यादिति वा आलोकते विलोकयति मदनपरवशतये ति भावः। तादृशचेष्टाकरणे
नवस्तुनानायकस्यमच्छेनुरक्तेयमिति घ्रतीतिरूपवस्तुध्वनिः॥ शार्दूलविक्रीडितंवृत्तं॥३१॥ इतिश्री अंबक
पंडितात्मजानंतपंडितविरचितायां रसमंजरी व्यंग्यार्थकौमुद्यां सपरिकरं परिक्रिया निरूपणं समाप्तिमगमत्।
लब्धावसरत्वात्सामान्यवनितालक्षयति। वित्तमात्रेति। विजेतरानुपाधिकत्वेसति वित्तोपाधिसकलपुरुष

Left margin: हृ॰ २ · स्य ३

Right margin: २८